दरलसमनाकामालेमननसतीदसारयानाइष्टाचवीनजेया ३ःशीलावला

35
७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

36

गल्मितंकामांकुशंविभ्रति ॥ अथास्थूलक्षणानि दीर्घंस्थूलशिरोरुहास्थूलहस्त
स्फारदन्तपाक्केभ्यनाभ्रस्तकमदीर्घकंघस्वदक्षोञ्जानतालीभिनः पीनोरुस्थूल
दीर्घबाहुयुगलानिशालवःसालमाः श्रोद्राबक्कनत्तांविजानयुगलासंनीर
संभाषिणः २ यक्षाःस्वउवनेरताश्वतिनांदीर्घांगुलिश्रेष्ठिमेःस्थूलहोरति
लालमाबद्भभ्रजोगन्यातृहष्याल्लिनाः भविताशंविनायिमनमयजलमाया
लयासाकुलाश्वदन्याग्गुलसंमितवक्तवगालिनांसदाविभ्रति २ अथमर।
गीलक्षणानि संहाऊंचितजनलासमगिरास्तनीस्तनगलनीफलदोव।
ल्लोचनालसविवञ्चाराणावनकेसदरी अरक्तायवयाशिखपादयुगलापीतो
रुकामालबाश्रायः कोमलचंचलांजंभुजकाविलीमद्वहनिः २ ३ छ्या।
लःस्वऊस्माभिकापिकरवातंनरनलयदाविभ्रतंजमज्ञागिमदनसंदनया।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हिरुच्यते समयश्चमितिप्रभेदतोनवधेयं संवतंसमीरतं १२ चंद्रमध्यममंत्राख्यो
हीनभेदाश्चवद्दलयोः क्रियाचविविधाः प्रोक्तालघुमध्यविरोद्यया. १३ अ
न्याप्यकालभेदेननवधानसमस्तहृयेन समाविंशाविशत्याहिकोर्तितेवर्तितेवैयैः
१४ यवडवोगवहृवोविहरहिः कामाऊलतन्वरनिलोलूलनावस्यात्मरवेगावि
पतितमततनमध्यभावःखल्वमध्यमेव १५ अथवाद्यरूपंनिरूप्यते प्रायःको
मलकंजनलायभद्रस्याः पांनक्षितकृपानाः सत्त्वाग्राशुवयःसर्वतैलमलाक्त
स्ताल्पेरत्नाद्यथा विभ्रांतकारयादजानुजमनग्रीवोनुभस्यामतोयन्याःस्वल्प
ताःसगांपिमदनस्पदाःविनीतःयाशाः १ अथहृषभाःस्तराः प्रोन्मनमोलयो
दठमजाःसप्रोदवक्षस्थलाःरू॰ मंनिभोदराश्रक्रहिनाभ्याग्रान्विताःपी
वरः सोरांनः स्थिरदीर्घवलोवतभरतः हस्वादराः कोलमन्तः स्थिरव्रषभातवा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वकं ४ नवस्रयाक्तेस्वरतेममेस्याङुचकैर्विङुःहस्तिनीशाहयंमध्यममेवर्थविधात
नीवयमेन्तुजमध्यातिनीचमन्यनं स्थिकाविभिर्चरेद् ५ क्रमयाकयोर्गन्द्र
वन्हियालङ्मध्योरुवलाःस्तएलवेजनयोनिवलान्तमारनोवद्भकेड्वन्ति।
नाजनस्यने प्रमाणाहीनलिगेनसाकेडूर्नीयषशाम्यति श्रेनानतीवसंभोगे
वहिगंछतिबाधितः ६ वरांगमध्यनारीणामत्यंतकोमलेस्यत श्रतिप्रमा।
णलिंगेननातेःस्नासांमसर्वभवेत् समप्रमाणलिंगेनस्थूलेनसरटनव शमय
न्स्लकेङ्गितसंरयस्त्रमङुमेकुः ७ कामकेलिकलाभिम्नस्वयत् विविधेर्गुणैः
विस्रष्टकामसलिलावशीकुर्यान्मगीदृश्या ८ नारीविस्रष्टऊसमेपुजलाय।
नानेन्तस्यकेशनिवद्भलावनतारेनव वेकल्यमेतिमङ्गलोकतयाहतेचाशाका।
मिनोकिमपिसोडमर्मिप्रयासा ९२ विरुमध्यमशीघ्रसंभवानदनाख्यालविस्र

अं मंडलमन्यकरांगमंदारयनकौलिश कामायनाव्युद्धलिकं भवनकरः संग्यकरतंतुका
रं दर्शौ हरणिति योरवलितः सहनेनकर्यानवेहहलिनी २ इति श्रीमल्लाडनवलाविनो
५ दायमहाकविकल्याणमल्लविरचितेनंगरंगे चंद्रकलातिथ्यर्णानाम द्वितीयः
स्थलः २ अथशशमृगवृषाश्वजातिभेदेन नरनारीभेदेन सुरतभेदान्निरूप्यते आदौ हि
मदसौजन्यस्वरूपज्ञेयाः सदा यस्त्रियो योनीनां परिणाहकेशरमनवादित्यापुली
के: क्रमात जात्यानुनराः शशवृषहयाख्याः तथैव योनागमन्याष्टाविगता
अकल्पिताशाकरस्त्रीपरि सर्वतः २ हरिणीशशयोर्हयवृषयोस्समयोगाः करिणीत्व
श्वयोरभवतीहयरसकहयोरन्तिनराधीनिरतंरामंगरेहरिणीहयवन्नतथास्त्रिका
नवृषाचाद्यमितिकर्यशनेनैश्वशीशशशांकहियोहयवस्वनमताह्नियंतनीचकं २ न
वशीहययोर्योगेरतमत्यद्वकोविदुः हस्तिनीशशयोस्त्राव्यतेरतस्यादरतस्यादतनी।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हृयनटेनवेतरतौ यास्वलंमुक्तानंगाजलांस्वकीयवशायोऽऽयान्त्रंरः योविनी
२ वृत्तः कपोलगलकांपदेश्रयकृतप्रायोनखातिपरिम्यहृता स्पपानः
माटविम्रममदनालयमाश्रुमाश्रीसद्भावयन्मरवरः किलममपीड २ पश्चिम
टहयविकुटपिवनाचानरतोवणाके नखरैः परनाविदारयपुमस्ववशाराभ।
नियानयनृप्रिया २ विलपल्लवैः सिरोयशमघनहृस्रजेचोमूमोकृनव
रिचुव्यकपोलमगनाम्लपयेदाशुतियामनोद्भवः अथहलिनौ मदनमद
नमुद्वैमेटयन्ताभिमूले नखविलतिजयागणदेनवासोतिपायमदुनवकाजा
शेः सलिषन्नाश्वदशेकलितऽवरभीनावलभः स्पालवम्या २ नयनेपरि
चुव्यकवयानेवरायानरतः स्वाणलये रवयनकटिकेलिमानयनखवशा
हिपागना २ नानालिननिधुवनानिरवयनप्रायेणानीलानेरवः कवारस्तत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
दे
४

हे मूलाधारस्थ दल्ह्वं द मण्डलकेशरहस्त्नबीजहयं ॐ वं नमो नमः यमं दिवकं दिवक
कोडायितं तु मान समांसास्वाधिके रवतो ॐ वं नितिचि सिया २ कोणां
हस्तनमरन्ययहरुमटनागावे भुकस्यातथ्याकामित्वावि जवाम पाशिका।
मलकान्तः मणलोड यन श्रीवापाशिता हेलिपे स्वधातके शुवनल
लादम्रवा ऊर्ध्वादाशुविस्हवमस्तयजलाद्यामादयाम्पातिथौ ३
गादमस्यनिस्भगाडफलकोत्तुवनदशस्वायपंवकामिश्यागितानवमदा।
नेवसिकः ॐ वं नमो मेघहेशाः मकुण्याद्वि ऊर्ध्वानविलामनवालः तौ।
कामपुत्राप्रिया हादशपालश्याति विद्धलननेन ॐ धीम्नुतौविद्यावितो ४
श्रय सा रिव नाथ्यद्रकला वाङ्मयापविहम्यगाढमयवदमेदधात्विदे।
येदोमेलेलवरपाशाजदननवयपयहननयमेहमरशांसऊं वं नकुलितिजव ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हर्षोत्तिनानं सीत्वाभ्रमरवक्रीभ्रतिपदिनलिनीद्रावयेन्नाविस्मयः २ संत्र
ब्धंदनवसनजव्रनेकपोलेपादहृयस्तनश्रोवनखोतिदमाघाथःभ्रुहृमद
नाभुगलारव्यतिख्याकामीनयनंद्रवदशानलिनीसहयं २ गाढालिंगह
वेकंजवधृगसपोऽप्रदनकृदहणावाप्तरैदयातकलेकपक्षत्तनवोस्याद।
एत दात्तलेसहसामकृपुविनकेऊर्वप्रवनध्यातियोकामसंप्रतिवाथ।
वेष्टकलयाऊर्यातिजायोचनो ३ दष्टापदंतदनयीनऊचोविम्रंवपाय
गावुवकभ्रगपविहुस्वरागान कपास्येरदित्रगाकवेणाविकष्मसंदऊया
सविह्वलननंकिलयंचमोघ ४ भ्रषविविर्गीवदकुला भ्रयपूपरित्रु
व्यक्यत्रामघसगिग्रप्रलरवेर्तिनवकं विलिखननुतमेवविविणीनन्वध
स्याद्रवनानयेत्नरः २ कंदसंपरिवम्पवाकूलनयानाभ्रीन्तिवतपासीतै
42

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
२
२

कल्लाकुवोरः स्थलेनाभि श्रोणितवरांगज्ञानविषयेणहके कस्माकसविभा।
गतोमनसिजक्तिहेतक्रमायेयष्विता वामाणेषुयउर्द्धतोर्मिणमतलान्यातस्य
पहहये सोमतेकरजटदोनतयनगउंपिसवृकनदनेनाथरखउनवनौ
लवैः कलासकंठालिखेत श्रोणीवायऊर्चकरेणसहदंगरस्तनेनामोउ
नः सदयातचपटकस्मरहेमानवलीलायते २ ऊर्वोर्हवस्मिनाउनतशा
नकैर्मष्यासकउहिमानज्ञानगुह्यपरधुगल्पविषयेतेगमलोवातन अन्य
चेद्रकलायदीयबविदोग्रगानिनाभोगिनानीमानीयवशोऊरुगनयला।
विटनिसारयापर अथनासामवह्यक्तयाशमिकल्लोच्यते तत्रादौपधिस
सद्रकला कटेसंभिन्नयमाठंमखकरजचयंगउपल्सोनितवहयाघंदरे
वाविदयदयवदेः लंउयनदंतवासः मल्लाङ्गवहृलाटवयुषिज्ञतयततोम

५३

२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तुगंपिरनिजलोयंभरसंमंदमा उःसायाम्हतत्तिम हंववास्तलोपिलाहोत्ति
नो श्रयनलिनीभ्रमरनीमांसवलत्तिथयउथंत वेदाहोउपारश्रमख्यातिथयः
श्रोकाः नलिस्यावतेभोगयादिसेटस्वातंमंत्ख्यतिथिउश्रीतामवद्विविणो हत्ते
भोगियाणामहमनुतिथिउश्रायादवछोलिनी राकादशावलदेशीप्रहमिनाबे
निद्रवहलिनीराजश्वनथेवरानलिनीहवनसयाजिविचरयितायथमेथ
याके श्रीसेन्यनरनीयवरणः खलशालिनीलोनकदिनाहमपिहलिवपत्तता
नो २ हजनीसहनेउयथिनीनमहलयाजितसर्वतः कविन दिवहसिश्रयेपानो।
यिसाविकमत्यवुजनीयुथासवेः ३ इति श्रीमल्लाउ तमल्लविनोदायमहाकक
ल्याणमल्लविवविरचितेनासेयथियमारिजातिवर्णितंनामप्रथमः स्थलः अ
थप्रितीश्रमरनीकासायारणीवद्रकलातिहृष्यवे सीमंतास्यथकपालगालके

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ॐ श्रीगणेशाय नमः अखिलललितविलासं विश्वे नोति वा मे सम मरक्तनविका
मे मौव राम्रौ श्रणाया रतिनयनविरामं मे मंत वाश्रि राम श्रम म विजिन वा मे श
मदं नौ मि काम २ लोरी व शाक्ल माहृ नवि ङ्व नि ता न ज वा षि ष्ण स्तन ष्ट मे
नौ तु वा हि स्य म ल व स्य शो लो ल या सार्विनार्षि: नमज: ख्याति कीर्ते रहमदन।
यत: कामसिद्धान्तविहान ज्ञो याज्ञो ला उ बान: द्विति प नि म ऊटे: छे ह्य दा
रविंट: २ असव कोन कौ नि म्नि न मन राव ग्रय विलास जन वह भ मानवा म
श्रीमान्महान्कौ विविशेषकलाविदग्ध: कल्याणामहल्य निम्नप्रकृतिर्यसा स्वो ३
मतानि ट ष्टाव कृसा मुनी तान मार मादय्य निरूपयामि अनेन गना कौलिक
लान ग्री ग्री हि: मदाय उकैप: सभाया ४ नि: मोजगाति प्रयव सट शासर
ऊर्मी सै सि ट याम कं मोगम्र लं य रास्य ष्ठस्माने टेनन स्नि विडु: नञ्जाम्याटि

45

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

46

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अशोत
रपतोलोके राजसमं मंत्रीत्वादि —

प्रथम – ~~[illegible]~~

अन्तिमा पंक्ति – सुशापवांतस्य भाया।

= देवनागरी

= संस्कृत - भाषा

पृष्ठ = ९५-१२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अज्ञात

आकार – २८×१५
पत्र – ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

94-121 (1)

यथा लोके राजसमं मंत्रीत्यादिवाक्येषु तत्समशब्दस्य किंचिद्दीनेप्रयोगादर्शनान्महतः पात
मि॰ता॰ कस्येतरस्य च तुल्यत्वस्यायुक्तत्वाच्च एवं च सति याज्ञवल्क्येन ब्रह्महत्यासमत्वेनोक्तानामपि ब्रह्मोज्झ
५४ वेदनिंदासुहृद्वधानां मनुना यत्सुरापानसाम्यं ब्रह्मोज्झता वेदनिंदा कौटसाक्ष्यं सुहृ
द्वधः गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षडित्युक्तं तत्प्रायश्चित्तविकल्पार्थं एवम
न्येष्वपि वचनेषु विरोधः परिहर्तव्यः यत्तु वसिष्ठेन गुरोरलीकनिर्बंधे कृच्छ्रं द्वादशरा
त्रं चरित्वा सचैलः स्नातो गुरुप्रसादात्पूतो भवतीति लघु [redacted] प्रायश्चित्तमुक्तं तदमतिपूर्वे
सकृदनुष्ठाने च वेदितव्यं ॥ गुरुतल्पातिदेशमाह ॥ पितुः स्वसारं मातुश्च मातुलानीं स्नुषा
मपि । मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ॥ आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्प
गः ॥ लिंगं छित्वा वधस्तस्य सकामायाः स्त्रिया अपि । पितृष्वस्रादयः प्रसिद्धाः ॥ ता गच्छन्गु
ल्प२ रुत [redacted] गः ॥ लिंगं छित्वा राज्ञा वधः कर्तव्यो दंडार्थं प्रायश्चित्तं तदेव चशब्दा [redacted] च्च प्रव्रजितादी ५४
नां च ग्रहणं ॥ यथाह नारदः ॥ माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ॥ पितृव्यसखि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शेषप्रतिपादनात्प्रायश्चित्तगुरुत्वं युक्तं । स्वयोनिर्भगिनी त्वं त्यजा चांडाली सगोत्रा समा
नगोत्रा सुतस्त्रीस्नुषा एतासां गमने प्रत्येकं गुरुतल्पसमा एतच्च रेतःसेकाद्यर्थं वेदितव्यं 2
स्वयोनिस्त्रीत्वेनोक्तानां तु न गुरुतल्पसमत्वं किं तल्पमेव प्रायश्चित्तं रेतःसेकः स्वयोनिषु कुमारी
ष्वंत्यजासु चासरवुः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुरिति मानवे रेतःसेक इति विशेषो
पादानात् । सगोत्रागमने वसिष्ठे पुनः सुतस्त्रीगमने प्रायश्चित्तगौरवप्रतिपादनार्थं अ
त्र च ब्रह्महत्यादिसमत्ववचनं गुरुविधिः पादेस्तत्तन्निमित्तप्रायश्चित्तोपदेशार्थं ननु वे
दनिंदादौ दोषस्य लघुत्वात् गुरुतरं ब्रह्महत्यादिप्रायश्चित्तं न युज्यते ॥ नैवं ॥ गुरुप्रायश्चि
त्तोपदेशबलाद्वेदनिंदादौ दोषगुरुत्वावगतेः न च ब्रह्महत्यादिप्रायश्चित्तातिदेशार्थं मेदं वचनं न वे ६
वति किंतु दोषगौरवमात्रप्रतिपादनपरमित्याशंकनीयं । यतस्तावन्मात्रप्रतिपादनप
रत्वे ब्रह्महत्यासममिदमिदं गुरुतल्पसममित्यादिनिर्देशे न तु समत्वाभिधानं नोपपद्यते तत
स्तत्प्रायश्चित्तं समशब्देनोपदिश्यमानं ब्रह्महत्यादिप्रायश्चित्तं न पुनः किंचित्तन्न नमेवोपदि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सखीदुहिताचपितृष्वसामातुलानीस्वसाश्चभ्रूणंगत्वासद्यःपतेन्नरइति।गौतमेनपुनर ३
न्येषामपिपातकत्वमुक्तं।मातृपितृ[illegible]योनिसंबद्धागस्तेननास्तिकनिंदितकर्माभ्यासि
मि.ता. पतितात्यागपतितात्यागिनःपतिताःपातकसंयोजकाश्चेतितेषांचमहापातकोपपा
तकमध्यपाठात्महापातकात्न्यूनत्वमुपपातकात्गुरुत्वमवगम्यतेतदुक्तं।महापात
९५ कतुल्यानिपापान्युक्तानियानितु।तानिपातकसंज्ञानितन्न्यूनमुपपातकमिति।तथाचां
गिराः।पातकेतुसहस्रंस्यात्महत्सुद्विगुणंतथा।उपपापेतुरीयंस्यात्नरकंवर्षसंख्य
येति।एवंमहापातकानिपरिगणय्योपपातकानिपरिगणयितुमाह।गोवधोव्रात्यता
स्तेयमृणानांचानपक्रिया।अनाहिताग्निताऽपण्यविक्रयःपरिवेदनं॥भृताद्ध्ययनादा
नंभृतकाध्यापनंतथा।पारदार्यंपारिवित्यंवार्द्धुष्यंलवणक्रिया।स्त्रीशूद्रविट्क्षत्रव
धोनिंदितार्थोपजीवनं।नास्तिक्यंव्रतलोपश्चसुतानांचैवविक्रयः।धान्यकुप्यपशुस्तेय ९५।
मयाज्यानांचयाजनं।पितृमातृसुतत्यागस्तडागारामविक्रमः।कन्यासंदूषणंचैवपरि

[illegible] पातकानि ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शिष्यपत्नी नप्तृगिनीतत्सुतादीतनुका। दुहिता चार्यभार्या च सगोत्रा शरणागता॥ राज्ञी प्रव्रजि
ता धात्री साध्वी वर्णोत्तमा च या॥ आसामन्यतमां गच्छन् गुरुतल्पग उच्यते। शिस्नस्योत्कर्तना
त्तरनान्यो दंडो विधीयत इति। राज्ञी राज्यस्य कर्तुर्भार्या न तु क्षत्रियैव। तद्गमने प्रायश्चित्ता
न्तरोपदेशात्। धात्री मातृव्यतिरिक्ता स्तन्यदानादिना पोषयित्री साध्वी व्रतचारिणी। वर्णो
त्तमा ब्राह्मणी॥ अत्र मातृग्रहणं दृष्टान्तार्थं। अयं च लिंगच्छेदवधात्मको दंडो ब्राह्मणव्य
तिरिक्तस्य। न जातु ब्राह्मणं हन्यात् सर्वपापेष्ववस्थितमिति। तस्य वधप्रतिषेधात्। वधस्यै
व प्रायश्चित्तत्वात्। अस्य च विषयं गुरुतल्पप्रायश्चित्तप्रकरणे प्रपंचयिष्यामः। अत्र स्नु
षाभगिन्योः पूर्वश्लोकेन गुरुतल्पसमीकृतयोः पुनर्ग्रहणं प्रायश्चित्तविकल्पार्थं। यदा पुन
रेताः स्त्रियः सकामाः सत्यः एतानेव पुरुषान् वशीकृत्योपभुंजते। तदा तासामपि पुरुषव
द्वध एव दंडः प्रायश्चित्तं च। एतानि च गुर्वधिक्षेपादितन्नयाजमैथुनपर्यंतानि महापातका
तिदेशविषयाणि सद्यः पतनहेतुत्वात् पातकान्युच्यंते। यथाह यमः। मातृष्वसा मात

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अदीक्षितविट्क्षत्रवधः ६

मि॰ता॰ ९६

साधिकारत्वाविशेषादाधानस्य प्रयोजिका इति स्मृतिकाराणां मतिः प्राप्तोल्लङ्घन इत्य
दोषः। तथात्र पण्यस्य च लवणादेर्विक्रयः। सहोदरस्य ज्येष्ठस्य तिष्ठतः कनीयसोभ्रा
तुर्दाराग्निसंयोगः परिवेदनं पणपूर्वोध्यायकादध्ययनग्रहणं पणपूर्वाध्यापनं पर
दारसेवनं गुरुदारतल्पसमव्यतिरेकेण। पारिवित्यं कनीयसि कृतविवाहे ज्येष्ठस्य विवा
हराहित्यं। वार्धुष्यं प्रतिषिद्धवृद्ध्युपजीवित्वं। लवणस्योत्पादनं। स्त्रिया वधः स्त्रीणामा
पात्रेयीव्यतिरेकेण। शूद्रवधः। निंदितार्थोपजीवनं मूराजस्यापितार्थोपजीवनं। नास्ति
कोनास्ति परलोक इत्याद्यभिनिवेशः। व्रतलोपो ब्रह्मचारिणः स्त्रीप्रसंगः। सुतानाम
पत्यानां विक्रयः। धान्यं व्रीह्यादि। कुप्यमसारद्रव्यं त्रपुसीसादि। पशवो गवादयस्तेषाम
पहरणं। गोवधो व्रात्यता। तात्स्थमित्यनेन स्तेयग्रहणेनैव सिद्धे पुनर्धान्यकुप्यादिस्तेय
ग्रहणं नित्यार्थमतो धान्यादिव्यतिरिक्तद्रव्यस्तेये नावश्यमेतदेव प्रायश्चित्तमपि तु ततो न्यू
नमपि भवत्येतेन बाधवत्यागग्रहणेनैव सिद्धे पुनः पित्रादित्यागग्रहणं व्याख्यातं।

९६

न्यार

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विंदकयाजनं।कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं।आत्मनोर्थे क्रियारंभो मद्यपस्त्री
निषेवणं।स्वाध्यायाग्निसुतत्यागो बांधवत्यागएव च।इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजी
वनं।हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः।शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवनं
तथैवानाश्रमेवासः परान्नपरिपुष्टता।असच्छास्त्राधिगमनमाकरेष्वधिकारता।भार्या
उ५ या विक्रयश्चैषामेकैकमुपपातकं।गोवधो गोपिंडव्यापादनं।काले ऽनुपनीतत्वं व्रात्य
ता।ब्राह्मणस्वसुवर्णोत्तमव्यतिरिक्तपरद्रव्यापहरणं स्तेयं।ऋणगृहीतस्य सुवर्णादेरप्र
दानमृणानामनपाकरणं।तथा देवर्षिपितॄणां संबंधिनां ऋणानामपाकरणं च।सत्यधिका
रे ऽनाहिताग्नित्वं।ननु ज्योतिष्टोमादिकाम्यक्रतवः स्वर्गकामानिनिष्पन्नार्थमाधानं प्र ग५
युंजीत इति मीमांसकप्रसिद्धिरतश्च यस्याग्निभिः प्रयोजनं तस्य तदुपायकृताधाने प्रवृ
त्तिर्वा स्यादर्थिनः स्वधनार्जने।यस्य पुनरग्निभिः प्रयोजनं नास्ति तस्याप्रवृत्तिरिति क
थमनाहिताग्नितादोषः।उच्यते।अस्मादेवानस्यावश्यकात् वचनान्नित्यक्रतवोपि
धा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नं।२ हीनेषु मैत्रीकरणं। अत्र ऋणादानं दारस्य केवलं हि नवगणितादारोपमामने

दृष्टप्रयोजनसिद्ध्यर्थमार्द्रद्रुमच्छेदोनत्वाहवनीयपरिरक्षणार्थमपि। स्त्रियाहिंसयाओ
षधेनच्चजीवनं वर्त्तनं स्त्रीहिंसौषधजीवनं तत्र स्त्रीजीवनं नाम भार्यायां पण्यभावेन प्रयोज
तत्प्रबोपजीवनं। स्त्रीधनोपजीवनं वा। हिंसयाजीवनं प्राणिवधेन जीवनं। औषधजीव
वनं वशीकरणोपि। हिंस्त्रयंत्रस्यापि तिलेक्षुपीडाकरस्य प्रवर्त्तनं। व्यसनानि मृगयादीन्यष्टा
दश। आत्मविक्रयो द्रव्यग्रहणेन परदास्यकरणं। शूद्रसेवनं हीनमित्रं। परपाकर
तित्वं असच्छास्त्रस्य चार्वाकादिग्रंथस्याधिगमः। सर्वाकरेषु सुवर्णाद्युत्पत्तिस्थानेषु रा
ज्ञाज्ञयाधिकारित्वं। भार्याया विक्रयः। चशब्दान्मन्वाद्युक्ताभिचारं मतिपूर्वलशुनादिनद
व्याणां देयप्रदानं। एषां गोवधादीनां प्रत्येकमुपपातकसंज्ञा वेदितव्या। मनुना पुनरन्यान्यपि
निमित्तानि जातिभ्रंशकरसंकरीकरणापात्रीकरणमलिनीकरणसंज्ञानि परिगणि
तानि। ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः। जैह्म्यं पुंसि च मैथुनं जातिभ्रंशकरं स्मृ
तं। खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा। संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अयाज्यानां जातिकर्मदुष्टानां शूद्रव्रात्यादीनां याजनं। पितृमातृसुतानामपतितानां त्यागो
गृहाग्निःकासनं। तडागस्यारामस्य चोद्यानोपवनादेर्विक्रयः। कौंपीयाद्दूषणा मंत्रसुत्या
दिनायोनिविदारणां न तु संभोगस्तस्य सदिकन्यायो कुमारीष्विति गुरुतल्पसमत्वस्योउ
२८ क्तत्वेल्पविंदकयाजनं तस्य च कन्याप्रदानं। कौटिल्या गुरोरन्यत्र गुरुतु विषयस्य तु कौटि
ल्यस्य सुरापाणसमत्वमुक्तं। पुनर्व्रतलोपग्रहणामव शिष्टप्रतिषिद्धे पि हरिचर
णाकमचेन्हणात्प्राक्तां बूलादिकं नन्नद्वायामीत्येवं रूपेषु प्राप्नर्थं न तु स्नातकव्रतलोपे वप्रा
यश्चित्तमन्नोजनं इति मनुना लघुप्रायश्चित्तस्य प्रतिपादितत्वात्त थात्मार्थं पाकलक्षणक्रि
यारंभः। अघं स केवलं भुंक्ते यः पचत्यात्मकारणादिति तस्यैव प्रतिषिद्धत्वात्। क्रियामा
त्रविषयत्वे तु प्रतिषेधकल्पना यां गौरवं स्यात्। मद्यपायाः स्त्रियाज्ञायायायात्रपिनिषेवणा
मुपसंयोगः। स्वाध्यायत्यागो व्याख्यातः। अग्नीनां चश्रौतस्मार्तानां त्यागः। सुतत्यागः संस्का
राद्यकरणं। बांधवानां पितृव्यमातुलादीनां त्यागः सति विभवे अपरिरक्षणं। पाकादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि·ता·
५८

जा

नं समुत्कर्षे रागामिच पैशुन्यं गुरोः अलीकनिर्बंधो वेदनिंदा अधीतस्य त्यागोऽग्निपितृ
मातृसुतदाराणां त्यागः चान्ननोऽपाणां च भक्ष्याणां परस्वापहरणं परदाराभिगमनं याज्यानां मर
चयाजनं व्रात्यतानृतकाध्यापनं वृत्तायापनाद्दानं सर्वाकरेष्वधिकारो महायंत्रप्रवर्त
नं द्रुमगुल्मलतौषधीनां हिंसया जीवनं अभिचारमूलकर्म मैथुनं च शूद्रवृत्तिरात्मार्थं क्रि
यारंभः नास्तिकताग्निताद्देवर्षिपितॄणामृणानपाक्रिया असच्छास्त्राभिगमनं नास्ति
कता कुशीलवता मद्यपस्त्रीनिषेवणमित्युपपातकानि ब्राह्मणस्य रुजः करणमघ्रेय
मद्ययोर्घ्रातिः जैह्म्यं पशुषु पुंसि च मैथुनाचरणमिति त्यज्या जातिभ्रंशकराणि ग्राम्या
रण्यपशूनां हिंसनं संकरीकरणानि निंदितेभ्यो धनादानं वाणिज्यं कुसीदजीवनमस
त्यस्य भाषणं शूद्रसेवनमित्यपात्रीकरणानि पक्षिणां जलचराणां च [redacted] घातनं
कृमिकीटवधातनं मद्यानुगतभोजनमिति मलावहानि। यदनुक्तं तत्प्रकीर्णकमिति। ५८
कात्यायनेन तु महापातकसमानं विष्णुनानुपातकत्वेनोक्तानां पातकसंज्ञा दर्शि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं। अपात्रीकरणं ज्ञेयं असत्यस्य च भाषणं॥ कृमिकी
टवयोहत्या मद्यानुगतभोजनं। फलैधःकुसुमस्तेयमधैर्यं च मलावहमिति। अतोन्यन्नि
मित्तजातं प्रकीर्णकं कथ्यते॥ बृहद्विष्णुना समस्तानि प्रायश्चित्तनिमित्तनिमित्तान्युत्तरोत्त
रलघीयांसि दृष्टपृथक्संज्ञान्येव निदर्शितानि। ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णापह
रणं गुरुदारगमनमिति महापातकानि तत्संयोगश्च। मातृगमनं दुहितृगमनं स्नुषा
गमनमित्यतिपातकानि। यागस्थस्य क्षत्रियवध्ये वैश्यस्य च रजस्वलायाश्चान्तर्वत्न्याश्चात्रि
गोत्रायाश्चाविज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानि। कौटसाक्ष्यं सु
हृद्वध इत्येतौ सुरापानसमौ। ब्राह्मणभूमिहरणं सुवर्णस्तेयसमं। पितृव्यमातामह
मातुलनृपपत्न्यभिगमनं गुरुदारगमनसमं। पितृष्वसृमातृष्वसृगमनं श्रोत्रियर्त्विगु
पाध्यायमित्रपत्न्यभिगमनं च स्वस्रुः सख्याः सगोत्राया उत्तमवर्णाया रजस्वलायाः शरणा
[redacted] गतायाः प्रव्रजिताया निक्षिप्तायाश्च गमनमित्येतानि तान्यनुपातकानि। अनृतवच

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि॰ता॰ ९२

शोधयितुमाह॥ शिरःकपाली ध्वजवान्भिक्षाशी कर्म वेदयन्। ब्रह्महा द्वादशाब्दानि मित
भुक्शुद्धिमाप्नुयात्॥ शिरसः कपालमस्यास्तीति शिरःकपाली। तथा ध्वजवान् कृत्वा श
वशिरोध्वजमिति मनुस्मरणात्। अन्यच्छिरःकपालं दंडाग्रसमारोपितं ध्वजशब्दवा
च्यं गृह्णीयात्। तच्च कपालं स्वव्यापादितब्राह्मणशिरःसंबंधि ग्राह्यं। ब्राह्मणो ब्राह्मणं
घातयित्वा तस्यैव शिरःकपालमादाय तीर्थान्यनुसंचरेदिति। शातातपस्मरणात्।
तदलाभे अन्यस्य ब्राह्मणस्यैव ग्राह्यं। एतच्च द्रुमयं पाणिनैव ग्राह्यं। खट्वांगं कपालपा
णिरिति गौतमस्मरणात्। [redacted] ॥खट्वांगशब्देन दंडारोपितशिरःकपाला
त्मको ध्वजो गृह्यते। न पुनः खट्वैकदेशः महोत्तरः खट्वांगं गंधर्वमुरित्यादिष्वपवादेषुत
त्रैव प्रसिद्धेः। एतच्च कपालधारणं चिह्नार्थं पुनर्भोजनार्थं भिक्षार्थं वा। मृन्मयकपा
लपाणिर्भिक्षार्थं ग्रामं प्रविशेदिति गौतमस्मरणात्। तथा वनवासिना च तेनं ज वि ९२
तव्यं ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेदिति मनुस्मरणात्। ग्रामसमीपा

ने२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ता। महापापं चातिपापं तथा पातकमेव च। प्रासंगिकं चोपपापमित्येवं पंचको गणः। इति
न न्वूपपातकादीनां कथं पातकत्वं पतनहेतुत्वाभावात्। यद्वितेषामपि पतनहेतुत्वं त
पितृहिंमातृयोनिसंबन्धागमनत्यादिपरिगणनमनर्थकं। अथैवमुच्यते यद्यपि महापात 12
कत्वस्मेष्विवसद्यः पातित्यहेतुत्वं नास्ति। तथाप्यभ्यासापेक्षया पातित्यमविरुद्धमि
दितकर्माभ्यासीतिगौतमवचनादिति। मैवं। अभ्यासस्यानिरूप्यमाणत्वाद्विःशतकृत्वो
वा चेति। तत्रैवविशेषे संगीक्रियमाणे योषिद्धिर्दिवास्वपिति यः शतकृत्वो वा गोवधं क
रोति तयोरविशेषेण पातित्यं स्यात्। अन्यच्च। यत्रार्थवादे प्रत्यवायविशेषः श्रूयते
प्रायश्चित्तं वा कृतं वा तस्मिन्निन्दितकर्मणि यावदभ्यस्यमाने महापातकतुल्यत्वं भवति ता
वानभ्यासः पातित्यहेतुः। दिवास्वप्नादौ तु सहस्रकृत्वोप्यभ्यस्यमाने न महापातकतुल्य
त्वं भवति इति न तत्र पातित्यमतोयुक्तमुपपातकादेरभ्यासापेक्षया पतनहेतुत्वं।।। एवं
संव्यवहारार्थं संज्ञानेदसङ्कितं प्रायश्चित्तनिमित्तपरिगणनं कृत्वा नैमित्तिकानि प्रद

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि·ता· १०७

चर्यादियुक्तेनचतेनन्नवितव्यं।खट्वांगकपालपाणिर्द्वादशसंवत्सरान्ब्रह्मचारी
भिक्षायैग्रामंप्रविशेत्कर्माचक्षाणः।यथोक्तःपक्रमेत्संदर्शनादार्यस्यस्थानासनाभ्यां
विहरन्सवनेषूदकोपस्पर्शीशुद्ध्येदितिगौतमस्मरणात्।ब्रह्मचारीग्रहणाचवर्जये
न्मधुमांसगंधमाल्यदिवास्वप्नांजनाभ्यंजनोपानच्छत्रकामक्रोधलोभमोहहर्षनृ
त्यगीतपरिपरिवादनभयानीतिब्रह्मचारिप्रकरणोक्ताविरुद्धधर्मप्राप्त्यर्थंअतएव
शेषः।स्थानवीरासनाभ्यांमौंजीदंडकमंडलुः॥भिक्षाचर्याभिक्षार्थंचकूष्मांडीभिःसदा
जयइतितस्यानवेक्षितिशेषः।अत्रचसवनेषूदकस्पर्शीतिस्नानविधानात्तदंगभूतमंत्रादि
प्राप्तिरवगम्यते।तथाशुचिनाकर्मकर्तव्यमितितस्यसर्वकर्मसाधारणत्वात्व्रतच १००
र्यांगभूतशौचसंपत्त्यर्थंस्नानवत्संध्योपासनमपिकार्यं।तस्यापिशेषोपादनद्वारेण
सर्वकर्मशेषत्वात्तथाचदक्षः।संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु।यदन्यत्कि
रुतेकर्मनतस्यफलभाग्भवेत्इति।नचद्विजातिकर्मण्योहानिः।पतनमिति।वचना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दोर्वा कृतवापनो वा निवसेत् ग्रामांते गोव्रजेपि वा । आश्रमे वृक्षमूले वा सर्वभूतहिते रत
इति । तेनैवोक्तत्वात् । कृतवापनो वेति विकल्पात् । घ्राणाज्ज टीव्रतिं गमाते । अत एव
संवर्त्तः । ब्रह्महा द्वादशाब्दानि वालवा जटी ध्वजीति । तथा भिक्षाशनशीलश्चनैवास्मि
न्नान्च लोहितकेन मन्मयखंडशरावेण ग्राह्या । लोहितकेन खंडशरावेण ग्राममस्मि
न्नायेप्रविशेदिति । आपस्तम्बस्मरणात् । सप्तागारापवादमष्टं लभ्यते । तत्र नैत्यैव मसंक गा५
ल्पितानि भिक्षार्थं प्रविशेत् । सप्तागाराण्यपसंकल्पितानि चरेद्भैक्ष्यमिति वसिष्ठस्मर
णात् । तथैककालएव सा ग्राह्या । एककालाहारस्स्यादिति तेनैवोक्तत्वात् । तथैव मेन्द्रब्राह्मणा
दिवरोधेवकार्यं चातुर्वर्ण्यं चरेद्भैक्ष्यं वक्रांगी संयतः पुमानिति संवर्त्तस्मरणात् । तथा
ब्रह्महास्मीति स्वकर्म ख्यापयन् द्वारि स्थितो भिक्षां याचेत । वेश्मनो द्वारि तिष्ठा भिभि
क्षार्थी ब्रह्मघातक इति पराशरस्मरणात् । स्वयं चक्नैदाप्रित्वनियमो वन्यैर्जीवनाश
क्तौ द्रष्टव्यः । भिक्षायै प्रविशेद्ग्रामं वन्यैर्यदि न जीवतीति संवर्त्तस्मरणात् । तथा ब्रह्म

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि॰ ता॰ १०९

मंते। ब्राह्मणहत्यादशाब्दानीत्यत्रब्राह्मणशब्दस्यैकस्मिन्नप्युभयोर्बहुषुसाधारणत्वादेकस्मि
न्ब्राह्मणवधेप्रायश्चित्तं। तदेवद्वितीयेतृतीयेपि। तत्रैकब्राह्मणवधनिमित्तेकप्राय
श्चित्तानुष्ठानेसतीदंकृतमिदंनेतिनशंक्यतेवक्तुंदेशकालकर्तृसंप्रयोगानुवंध
भूतानामन्येद्युर्गृह्यमाणविशेषत्वात्तंत्रानुष्ठानेनैवपापक्षयलक्षणकार्यनिष्प
त्तियुक्ता यथातंत्रानुष्ठितैः प्रयाजादिभिराग्नेयादिषुतंत्रेणानेकोपकारलक्षणा
कार्याणांनिष्पत्तिः। नचैवंवाच्यं। द्वित्रिब्राह्मणवधेपापस्यगुरुत्वादेनसिगुरूणिगुरूणि
लघुनिलघूनिइतिवचनादावृत्तमेवप्रायश्चित्तानुष्ठानंयुक्तंविलक्षणकार्ययोस्तंत्रे
णनिष्पत्त्यनुपपत्तेरिति। यतोनेदंवचनमावृत्तिविधायकंकिंतूपदिष्टानांगुरुलघुक
ल्पानांव्यवस्थाप्रतिपादनपरं। नचद्वितीयब्राह्मणवधेप्रायश्चित्तस्यगुरुत्वंप्रमाणा
न्तरावगतं। यच्चमनुदेवलाभ्यामुक्तं। विधेःप्राथमिकादस्मात्द्वितीयेद्विगुणंचरेत्तृ
तीयेत्रिगुणंप्रोक्तंचतुर्थेनास्तिनिःकृतिरितितदपिप्रतिनिमित्तिकंनैमित्तिकस्या १०९

15

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गार्ग्येन हारितवचनस्य चरितार्थत्वात् इयं च मन मानवर्ल्कस्य येन मासिप्रतिपादिता द्वादश ४

16

संध्योपासनायाश्च द्विजातिकर्मत्वाद्दशाब्दिरिति इष्टां कनीयं । यस्मात्पतितसंयेव व्रतचर्योय
देशांतदंगतद्येवसंध्योपासनादिप्राप्नोति अतो द्विजातीनामध्ययनमिज्यादानं ब्राह्मणस्या
धिकाः प्रवचनयाजनप्रतिग्रहा इत्यादीनामेव द्विजातिकर्मणां व्रतचर्या न गम्भूतानां
हानिर्नसर्वेषां । तावन्मात्रं वार्षिकव्रतचर्यैकवेन पुनर्भिक्षापरस्परसायेद्गत्वादविरो
धीच्चातथा हि भिक्षाशीकमेवद्यन्नितुकेभिक्षापात्रं केषांवा गृहेषु वेत्याकांक्षाजा
येते वा तत्र लोहितकेन खंडशरावेण त्वा पस्तवादिवचनैः परिहरनमविरुद्धं । अतः
सर्वैरेककर्त्र्योपदेशाद्घत्के श्रुदुक्तो मनुगौतमाद्युक्तेति कर्तव्यता याः परस्परसापे
क्षत्वे पि विकल्प इति तदनिरूप्येवोक्तमिति मन्तव्यं । एवं द्वादशवर्षाणि व्रतचर्या मा
वेत्य ब्रह्महा शुद्धिमाप्नुयात् । इयं चाकामकृतब्रह्मवधविषया । इयं विशुद्धिरुदिता
प्रमाप्य कामतो द्विजं । कामतो ब्राह्मणवधे निःकृतिर्न विधीयते इति मनुस्मरणात् । अत्र
इष्टचिंतनीयं । किं द्विजब्राह्मणवधेप्रायश्चित्तस्यातं अत्यमुतास्विरितितत्र केचिन्म

द्वि २

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि.ता.
९२

भिसंधाय पापं कर्म सकृत्कृतं तस्येयं निःकृतिर्द्वितीयं धर्मविद्भिर्मनीषिभिरिति । न च विल
क्षणयोर्गुरुत्वलघुत्वदोषयोः स्वयमेव निःपद्यते । अत एवंविधेषु दोषगुरुत्वेन कार्यवै
लक्षण्यापादकप्रवृत्तिनिमित्तेन नैमित्तिकस्याहत्तियुक्ता । स्वामवत्यादिषु पुनः कार्यस्य वै
लक्षण्यापादकत्वं स्वभावतस्तावत्प्रपंचेन । यश्चेदं चतुर्थो नास्ति निःकृतिरिति तदपि म
हापातकविषयं पापस्यातिगुरुत्वेन प्रायश्चित्ताभावप्रतिपादनपरत्वात् । अतः शू
द्रान्नसेवादौ बहुशोऽभ्यस्ते तत्तद्गुरुप्रायश्चित्ताद्वृत्तिः कल्पनीया । न पुनः प्रायश्चि
त्ताभावः । अत एवोक्तं मनुना । पूर्वोचानसानस्थांतु कृत्वा व्रतं चरेदिति ॥ इदं च द्वा
दशवार्षिकं व्रतं साक्षाद्धन्तुरेव ब्रह्महेति तस्यैवाभिधानात् । अनुग्राहकप्रयोज
कादेस्तु तत्तद्दोषानुसारतः प्रायश्चित्ततारतम्यं कल्पनीयं । तत्रानुग्राहको यत्प्राय
श्चित्तभाजं पुरुषमनुगृह्णाति । तत्प्रायश्चित्तं पादोनं कुर्यात् । अतस्तस्य द्वादशवार्षि ९२
केन नववार्षिकी प्रयोजकस्त्वर्द्धेन षड्वार्षिकं कुर्यात् ।

स्वमावर्त्तत इति न्यायेन द्विजब्रह्मवधगोचरं नैमित्तिकशास्त्रं तत्समनुवादेन चतुर्थे त
दन्नावविधिपरं न पुनर्द्वितीयब्रह्मवधे प्रायश्चित्तानुष्ठाने द्वैगुण्यविधिपरमपि वा
कल्पेद् प्रसंगात्। तस्मात् द्विजब्राह्मणवधेपि सकृदेवा द्वादशवर्षानुष्ठानं युक्तं। त
थाग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदित्यादिग्रहदाहादिनिमित्तेषु वोदि
तानां क्षामवत्यादीनां युगपदेनेकस्य पिग्रहदाहादिनिमित्तेषु सकृदेवानुष्ठानमा
म्नायते। न हि वचनविरोधे न्यायः प्रभवति। वचनं च विधेः प्रायश्चित्तादिकं द्वि
जब्राह्मणवधे प्रायश्चित्तानुष्ठानावृत्तिविधिपरं एवं सति न्यायलब्धं तंत्रानुष्ठानं बा
धे नावृत्तिविधाविदं वचनं प्रवृत्तिविशेषकरं स्यात्। इतरथा शास्त्रतः प्राप्तानुवादक
लेनानर्थक्यं स्यात्। तच्च वाक्यभेदः॥ चतुर्थादिब्रह्मवधपर्युदासेनेतरत्राहत्य प्राय
श्चित्तविधानेनैकार्थ्यत्वात्॥ किं च॥ चतुर्थे नास्ति निष्कृतिरिति लिंगदर्शनात् अन्यमा
न प्रमाणासंख्योत्कर्षे दोषगौरवमवगम्यते। तथा देवलादिवचनात् ग्राह्यत्वादन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रोत्साहकादीनामपि दंडप्रायश्चित्ते कल्पनीये यथाह पैठीनसिः। हंता मंतोपदेष्टा च तथा सं-
मि॰ता॰ प्रतिपादकः। प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः। आश्रयः शस्त्रदाता च भक्त-
दाता विकर्मिणां। उपेक्षकः शक्तिमांश्च दोषवक्तानुमोदकः। अकार्यकारिणां तेषां प्रा-
९२ यश्चित्तं प्रकल्पयेत्। यथाशक्त्यनुरूपं च दंडं चैव प्रकल्पयेदिति। तथा बालवृद्धादी-
नां स्त्राद्याकत्त्वलेपार्द्धमेव वा। आशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चि-
त्तार्द्धमर्हंति स्त्रियो रोगिण एव च। तं गिरःस्मरणात्। तथाङ्गि॰ द्वौ कुर्याद्दशाद्दूर्द्ध्वं दशी-
ते तूर्द्धमेव वा। अर्द्धमेव भवेत्तुंसां तुरीयं तृतीयो षितामिति। तथा अनुपनीतस्यापि
बालस्य पादमात्रसेच प्रायश्चित्तं द्विगुणं महद्भ्यः प्रदातव्यं वृद्धानां योगिनां तथा पादो वा-
ले षु दातव्यः सर्वपापेष्वयं विधिरिति तिथ्युमस्मरणात्। अतश्च यच्छंखे। ना ऊनेका- ९२
दशवर्षस्य पंचवर्षात्परस्य च। प्रायश्चित्तं चरेद्भ्राता पिता वान्यः सुहृज्जन इति। प्रतिपा-
द्यो तं। अतो बालतरस्य स्वनापराधीन पातकं। राजदंडो न तस्यास्ति प्रायश्चित्तं न विद्य-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वार्षिकं। प्रयोजकस्तत्र द्वैवार्षिकं कुर्यात्। अनुमंता पुनः सार्द्धपादं सार्द्धं च तुर्थं वा
र्षिकं। निमित्ती लेकपादं त्रैवार्षिकं। अत एव वक्ष्यमंतुः। तिरस्कृतो यस्तु विप्रो हत्वात्मा
नं मृतो यदि। निर्गुणाः सहसा क्रोधात् गृहक्षेत्रादिकारणात्। त्रैवार्षिकं व्रतं कुर्यात् प्रति
लोमां सरस्वतीं। गत्वापि विष्णुं ह्यर्थतत्त्वा पस्पोति निश्चितं। अत्यर्थं निर्गुणो विप्रो ह्य
त्यर्थं निर्गुणोपरि। क्रोधाद्वेष्टि पतेयस्तु निर्निमित्तं तु जन्तितुः। वत्सरं ...
...निर्गुणोपरि र तत्तत्र यं कुर्यान्नरः कृच्छ्रं विशुद्धये इति। यदा पुनर्निमित्तं तं
त गुणावान आत्मा घाती वा त्यंत निर्गुणाः स्तदैक वर्षमेव ब्रह्महत्याव्रतं कुर्यात्। के
शश्मश्रुनखादीनां कृत्वा तु वपनं वने। ब्रह्मवृक्षे चरन्ति प्रोवर्षे सौ केषु उत इतितेनो प ४
वो तात्पात्। अनयैव दिशा अनुग्राहक प्रयोजकादीनां येनुग्राहक प्रयोजककृत्स्तेषामपि प्रा
यश्चित्तं कल्प्यं। अस्यां च कल्पनायां प्रयोजयितानुमंता कर्त्ता चेति स्वर्गनरकफलेषु क
र्मसु नागिन्प्रयोज्य ... आस्ते तस्मिन् फलविशेष इत्यापस्तंबीयं वचनं मूलं। तथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि·ता·
६.४

र्थं स्वर्गार्थं वानुष्ठितैराग्नेयादिभिर्नित्यनियोगनिष्पत्तिस्तद्वदत्राप्युपायश्चित्तस्यापि कार्य

सिद्धिः। यत्तु नमेधामीगिरोवचनं। गवां सहस्रं विधिवत्पात्रेभ्यः प्रतिपादयेत्। ब्रह्महा वि

प्रमुच्येत सर्वपापेभ्य एवं वदेति। तत्सवनस्थगुणवद्ब्राह्मणविषयं। एतच्च द्विगुणं सवनस्थे तु

ब्राह्मणे व्रतमादिशेदित्येतद्वाक्यविहितद्विगुणद्वादशवार्षिकव्रतचर्याशक्तस्य वेदित

व्यं। प्रायश्चित्तस्यातिगुरुत्वात्। न त्वनावृत्तद्वादशवार्षिकविषयं। तत्र हि द्वादशाब्दा दश

दिनान्येकैकप्राजापत्यमिति गणनायां प्राजापत्यानां षष्ट्यधिकशतत्रयं भवति। यद्यपि

प्राजापत्यप्रत्यास्मांतेच्यहं ऽपवासि कृत्त्वाप्यत्रवनं वासम्भावे पोकैकस्य द्वादशाहस्य

प्राजापत्यतुल्यत्वं तत्तत्प्रप्राजापत्यक्रियाशक्तौ धेनुं दद्यादिति चहन्नगणः। गवामन्नावेदात

व्यं तन्मूल्यं वा न संशयदत्यनेन न्यायेन प्रतिप्राजापत्यमेकस्यां धेन्वां दीयमानायां षट्चैन्नूना

मपि षष्ट्यधिकं शतत्रयं भवति। न पुनः सहस्रमतो यथोक्त एव विषयो युक्तः। यदपि शंखव

चनं। प्रमाप्य द्वादश संवत्सरान् षट्द्वीन्सार्द्धं संवत्सरं च व्रतान्यादिशेत्तेषां मतेगोस्स

२१

कामजटाधा
रणं वन्याह
रादिरूपत
पोषि...
पूर्वे...
६.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तद्वति। तदपि संपूर्णप्रायश्चित्तान्नावप्नोति पादेनापरं न पुनः सर्वात्मना तद्दशावप्नोति पावन
परं। आश्रमविशेषनिरपेक्षत्वाच्छ्रूयमाणेषु ब्राह्मणो न हंतव्यस्तस्मात्क्षत्रियो राजन्यो वैश्य
श्च न सुरां पिबेदित्येवमादिष्व नपेक्षितवयोविशेषस्यैवाधिकारात् तच्छ्रुतदी
यमपि प्रायश्चित्तं पित्रादिभिरित्येवं वरणीयं। पुत्रानुत्पाद्य संस्कृत्य वेदमध्याप्य वृत्तिं विद
ध्यादिति तस्यैव पुत्रहिताचरणेऽधिकृतत्वात्। यत्र पुनः कस्मिंश्चिद्ब्रह्मवधे प्रयोजककर्तृत्व
वमापन्नस्यान्यस्मिन्साहाय्यकर्तृत्वे गुरुलघुप्रायश्चित्तसन्निपातस्तत्र द्वादशवार्षिका
दिगुरुप्रायश्चित्तं। ततः पातिनः प्रयोजकसंबंधि लघुप्रायश्चित्तस्य प्रसंगात्कार्यसिद्धिः। नन्वे
वं सत्यविशेषाल्लघुकल्पेन महतोपि सिद्धिः स्यादित्याशंकनीयं। अत्र वदंति। ततः पातितयानु
ष्ठाने विशेषानवगमात्प्रसंगात्कार्यसिद्धिरुच्यते। तच्च लघुतः पाती महान्कल्प इति कु
तः प्रसंगाशंका। नन्वेवं चैत्रवधजनितकल्मषक्षयार्थमनुष्ठितेन कथं विष्णुमित्रवधोत्था
घपापनिवृत्तिरिति वाच्यं। चैत्राद्युद्देशस्यातंत्रत्वात्। अतो यथाकामनियोगनिःश्वात्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न।

धर्मस्यपरिहरत्वात्। अत्रोच्यते। नतावद्द्वादशवार्षिकंसेतुदर्शनादीनांविषमकल्पानां
मि.ता. विकल्पोऽवकल्पते विकल्पेऽप्रयासेनगुरुकल्पानामनुष्ठानासंभवेनानर्थक्यप्रसंगात्।
प्रा.५ नचषोडशिग्रहणाग्रहणवद्विषमयोरपिविकल्पोपपत्तिरितिवाच्यं। यतस्तत्रापिस २३
तिसंभवेग्रहणमेवेतियुक्तंकल्पयितुं। यद्वाषोडशिग्रहणानुगृहीतेनातिरात्रेणाग्नि
ष्टोमस्वर्गादिसिद्धिरितिशयितस्यवास्वर्गःस्यादितिकल्पनीया। इतरथाग्रहणविधेरान
र्थक्यप्रसंगात्। नापिसमुच्चयः उपदेशातिदेशप्राप्तिमंतरेणसमुच्चयोनसंभवति।
उपदेशावगतनैरपेक्ष्यस्यबाधप्रसंगात्। नचाङ्गाङ्गिभावः नक्षत्रादिविनियोजकाना
मभावात्। श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानिविनियोजकानि। अतःपरस्प
रोपमर्द्दपरिहारार्थंविषयव्यवस्थाकल्पनेवोचिता। साचजातिशक्तिगुणाद्यपेक्षया
कल्पनीया। जातिशक्तिगुणापेक्षंसकृद्बुद्धिकृतंतथा। अनुबंधादिविज्ञायप्रायश्चित्तंप्र प्रा.५
कल्पयेदितिदेवलस्मरणात्। पूर्वोक्तस्यब्रह्महत्याप्रायश्चित्तस्यनैमित्तिकसमाप्रविधि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हत्वं तदर्द्धं तत्स्यादूर्ध्वं च रद्यात्स्व वैश्यावर्णानामाराणु पूर्वेरोति । द्वादशवार्षिकाणेस्तह् न्य
योः समुच्चयविधिपरत्वदाचार्यादिहनने विषयं दृष्टवां तस्मात्तिगुरुहत्वात्तात यावदस्तः । स
ममवाप्तप्तर्णोदाने द्विगुणं त्राम्यतोषु आचार्ये शतसाहस्रं सोदर्यो दत्तमद्रय मितिप्र
तिपादितं तत्वान्यासमर्द्विगुणसाहस्रमानं तपत्रय थाक्रमदाने फलविशेषः स्यात् । हिंसा
यां तद्धदेवहि । तथापत्तं वेन द्वादशवार्षिकमुक्तो क्रमस्मिन्नेव विषये गुरुं हत्वा श्रोत्रि
यं वा एतदेव व्रतमोतमा [illegible] चरेदिति तत्र जातजीवमावत्स्मानेव्रतं यदा चैगु
रापि वा संजाव्यते तदा तत्रास मर्थस्य बहुधनस्य पदानतपसोः समुच्चयो दृष्टः । द्वादशवा म
र्षिकव्यतिरिक्तानां तु सुमन्तु [illegible] पराशराद्युक्तानां प्रायश्चित्तानामुक्त स्त्वव्यवस्थां वक्ष्या
मः । ननु कथं द्वादशवार्षिकादिकल्पानां व्यवस्था कुतो वसिता न तावत्स्वद्वादशवार्षिकादिविधा
यकवाक्येरितियुक्तं । तत्राप्रतीतेः । न च वाच्यं प्रमाणवगतगुरुलघुकल्पानां बाधो माप्रसां
द्वीति व्यवस्था कल्प्यत इति विकल्प समुच्चयांगांगित्वानामनुपपत्तमाश्रयणो नापि वा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि·ता· १६

हणां मग्निष्टुन्मेधानां पंचदशरात्रादिक्लृप्तंतराणां अग्निष्टुत्समाप्तिकानां वा सर्वमेधा

दीनां उपलक्षणं । अश्वमेधावभृथे वा आत्मयज्ञेप्यग्निष्टुदंतमेति गौतमस्मरणात् । अयं

च प्रक्रांतद्वादशवार्षिकस्य कथंचिद्ब्राह्मणाश्वमेधादिकं कुर्वतो व्रतसमाप्त्यवशि

ष्यते । यथा सारस्वतसत्रे स्नातं पुष्करं प्राप्योत्थानमवभृथे कृशातानां वा ग्रावास्ते हस्ता 25

वे सर्वस्वज्यायस्त्वं गृहपतिमरणे चेति । न पुनः स्वतंत्रं प्रायश्चित्तांतरं । यथाह प्रचेताः । द्वा

दशे वर्षे शुद्धिमाप्नोत्यन्तरा ब्राह्मणं मोचयित्वा गवां वा द्वादशानां परित्राणात् सद्य एवाश्व घ.

मेधावभृथस्नानाद्वा पूतो भवतीति । अत एव मनुना कृतवापनो वा निवसेदिति द्वाद

शवार्षिकस्य गुणविधिं प्रक्रम्य ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान्परित्यजन्मुच्यते

ब्रह्महत्याया इत्यादिना मध्ये ब्राह्मणत्राणादिकमभिधाय एवं दृढव्रतो नित्यं ब्रह्मचा १६

री समाहितः । समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति । इति द्वादशवार्षिकमेवोपसं

हृतं न तु ब्रह्महत्यायाः शुद्धिमवाप्नुयादिति ब्राह्मणत्राणादीनां द्वादशवार्षिकेण स

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पातो ब्राह्मणस्य परित्राणाद्गवां द्वादशकस्य। तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नु २८
यात्। यश्चोरव्याघ्रादिभिर्व्यापाद्यमानस्य ब्राह्मणस्यैकस्यापि व्यापत्प्राणानंतरेणत्वा प्रा
णत्राणं करोति। गवां द्वादशकस्य वा परिपूर्णेऽपि द्वादशवार्षिके शुध्येत्। यद्यपि प्रा
णत्राणोद्यतस्तदकृत्वैव म्रियते तथापि शुध्यत्येव। अत एव मनुना। ब्राह्मणार्थे गवार्थे
वा सद्यः प्राणान्परित्यजन्। मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य चेति। ब्राह्मणरक्षणं
तदर्थमरणं पृथुगुणात्वं। तथा परकीयाश्वमेधावभृथारव्यकर्मांतस्नानसमये स्व
यमपि स्नात्वा ब्रह्महत्यायाः शुद्धिं प्राप्नुयात्। स्नानं च स्वकल्मषं विख्याप्य कुर्यात्। तथा
कृ च मनुः। शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे। स्वमेनोऽवभृथस्नातो हयमेधे विमुच्यत
इति। भूमिदेवा ब्राह्मणास्त्विजस्तेषां नरदेवेन राज्ञा यजमानेन समवाये स्वीयमेनः
शिष्ट्वा विख्याप्याश्वमेधावभृथे स्नात्वा शुध्येत यद्यपि तौरगुणो तो न भवति अश्वमेधावभृ
थे ज्ञात्वा तत्रानुज्ञातः स्नातः सद्यः पूतो भवतीति शंखस्मरणात्। अश्वमेधावभृथग्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि.ता. प्र.७

24

धिविप्रःसमाहितः।ब्रह्महत्याकृतंपापंव्यपोहत्यात्मवित्तथेति।अतोग्निप्रवेशादीनां
स्वातंत्र्यमेवयुक्तं।अतश्चब्राह्मणत्राणादेरप्यैकफलत्वान्नांगत्वमितिउच्यते।परिहृत
मेतदंतराब्राह्मणंमोचयित्वेत्यादिनाशंखवचनेनांगत्वावगमात्।अंगस्यैवसतःप्र
धानाद्वारेणफलसंबंधः।नचप्रधानविरोधः।यतोब्राह्मणत्राणादधिकस्यैवव्रतानुष्ठान
स्यफलसाधनत्वंविधीयतइतिनविरोधः॥किंच॥दीर्घतीव्रामयग्रस्तंब्राह्मणंगामथापिवा
दृष्ट्वापथिनिरातंकंकृत्वातुब्रह्महाशुचिः।दीर्घेणबहुकालव्यापिनातीव्रेणदुःसहेनाम
येनकुष्ठादिव्याधिनाग्रस्तंपीडितंब्राह्मणंगांवातथाविधांपथिदृष्ट्वानिरातंकंनिरुजंकृ
त्वाब्रह्महाशुचिर्भवति।ननुब्राह्मणस्यपरित्राणादित्यनेनयदुक्तंब्राह्मणरक्षणंतदेवकि
मर्थंपुनरुच्यतेब्राह्मणंगामथापिवेति।सत्यमेवं।किंत्वात्मप्राणपरित्यागेनाधःस्तनवा
क्येब्राह्मणरक्षणमुक्तमधुनापुनरौषधदानादिनेतिविशेषः।अमुमेवाभिप्रायेणोक्तंमनु
ना।विप्रस्यतन्निमित्तेवाप्राणलाभेविमुच्यतइति॥किंच॥आनीयविप्रसर्वस्वंहृतंघा

प्र.७ वा.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽऽहिकफललाभगमात्स्वातंत्र्यमेव युक्तं न पुनरंगत्वं। किंच प्रधानविरोधित्वादपि नांगत्वं
प्रधानं तावन्नुग्रहैकहोमं गम्भवति न च प्रारब्धद्वादशवार्षिकस्यैतद्विधानं येन तत्कार्ये विधा
नं गम्यते। यथा सत्रायागूर्ये विश्वजिता यजेतेति सत्रप्रयोगप्रवृत्तस्य तत्परिसमापना
द्दोमस्य विश्वजिद्विधानमतोपि स्वातंत्र्यमेव युक्तं। तथाग्निप्रवेशलक्षणभावादीनां न
चतेषामपि द्वादशवार्षिकोपक्रमोपसंहारमध्यपठितत्वेन तदंगत्वमिति शंकनीयं।
यतः सत्यपि मध्यपाठे निर्ज्ञातप्रयोजनत्वे न प्रयोजनकांक्षाविरहान्न परस्परमंगांगित्वं
युक्तं। तथा सामिधेनीप्रकरणमध्यवर्तिनां निविंत्पदानामग्निसमिंधनप्रकाशनत्वेन सा
मिधेनीभिः सहैककार्यातां सामिधेन्यंगत्वं नैवैकं तत्तोग्निप्रवेशादीनां द्वादशवार्षि
कमध्ये पाठः। वसिष्ठगौतमादिभिरेषां द्वादशवार्षिकप्रक्रमात्प्रागेव पठितत्वादिद
मेव च स्वातंत्र्यं प्रकटयितुं मनुना लक्ष्म्यं शास्त्रकृतौ वास्यात्प्रास्यैतमानमग्नौ वेति प्र
तिवाक्यं वा शब्दः पठितस्तथा प्रतिप्रायश्चित्तमेवोपसंहृतं। अतोन्यतममास्थाय वि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि· ता·
९.८

तेस्वाहाकारं पठित्वा ते मंत्रैर्जुहुयात्। ते च हूयमानद्रव्याणां लोमत्वङ्लोहितमांसमेदः
स्नाय्वस्थिमज्जानाम् अष्टसंख्याकत्वाद् अष्टौ मंत्रा भवन्ति। तथा च वसिष्ठः। जूणा होमिमृत्युं समा
धाय तु जुहुयात् लोमानि मृत्युं वाशय इति प्रथमा। त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासय इति
द्वितीयं। लोहितं मृत्योर्जुहोमि लोहितेन मृत्युं वाशय इति तृतीयं। मांसानि मृत्योर्जुहो
मि मांसै मृत्युं वासय इति चतुर्थी। मेदो मृत्योर्जुहोमि मेदसा मृत्युं वासय इति पंचमी। स्ना
युनि मृत्योर्जुहोमि स्नायुभिर्मृत्युं वासय इति षष्ठं। अस्थीनि मृत्योर्जुहोमि अस्थिभि
र्मृत्युं वासय इति सप्तमी। मज्जां मृत्योर्जुहोमि मज्जाभिर्मृत्युं वासय इति अष्टमीमिति।
अत्र च लोमप्रभृति तनूं जुहुयादिति लोमादीनां होमद्रव्यत्वावगमाद्धोमकल्पः स्यादिति
सत्यपि चतुर्थीनिर्देशे लोमादीनां न देवतात्वं कल्प्यते द्रव्यप्रकाशनेनैव मंत्राणां सा
धनोपपत्तेः। किंतु लोमभिर्मृत्युं वासय इत्यादिवा(क्यैः) मंत्रपर्यालोचनया मृत्योरेव हविः
संबंधावगमाद्देवतात्वं कल्प्यते। अतश्च लोमादीनि सामर्थ्यात् त्वधिगतिनावदाय मृत्यूद्देशे

29

हो·म·२
९.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तितरववा।तन्निमित्तं द्वातः शास्त्रैर्जीवन्नपि विशुध्यति। विप्रस्यापहृतं सर्वस्वं तथा यावसीदत:
संबंधि द्रव्यं तस्मिन् एवमादिकं चौरैर्हृतं साकल्येनाहृत्य स्वामिनः यः करोति विशुध्यति। आनयने
प्रवृत्तः स्वयं चौरैर्घातितो वा यदि वा तन्निमित्तं ब्राह्मणस्य सर्वस्वानयनार्थं तत्र युध्यमानः श
स्त्रैः हतो मृतकल्पो जीवन्नपि विशुध्यति। शस्त्रैरिति बहुवचनं हतत्वबहुत्वप्रदर्शनार्थं। अत
एव मनुना॥ अवरं प्रतिरोद्धा वा सर्वस्वमवजित्य वेति अवरं ग्रहणं कृतं एतस्य श्लोकद्व
योक्तं व्यापंचकं अपब्राह्मणस्य रक्षणारूपत्वेनांतरा वा ब्राह्मणं मोचयित्वेतरेण शरीरव्यय
मेनक्रोडीकृतत्वात्। द्वादशवार्षिकस्य मासस्य वधित्वेन विनियोगात्स्वातंत्र्यं॥ ॥प्रायश्चि
त्तांतरमाह॥ ॥लोमभ्यः स्वाहेत्येवं हि लोम प्रभृति विवेत्तनु। मज्जांतां जुहुयाद्वापि मंत्रै
रेभिर्यथाक्रमं। लोमभ्यः स्वाहेत्येवं हि लोम मज्जांसां तनुं जुहुयात्। इति शब्दः करणा
ब्दनिर्देशार्थः। एवं शब्दप्रकारसूचनार्थः। हि शब्दः प्रसिद्धं तर प्रसिद्धमांसादीनां प्रवृत्तिश
ब्देनाक्षिप्यमानानां द्योतनार्थः। ततश्च लोमादीनि लोम मज्जा त्वा चतुष्पाणि निर्दिष्टानि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि॰ता॰ मतो महापापं नरः कुर्यात्कथंचन। न तस्याशुद्धिर्निर्दिष्टा भृग्वग्निपतनादृत इति। एतच्च प्रा
यश्चित्तं स्वतंत्रमेव न ब्राह्मणत्राणादिवत्। द्वादशवार्षिकां तन्मृत्युमित्युक्तं प्राक्॥ ॥ किंच॥ सं
९९ ग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात्। मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुध्यति॥ अयमर्थः 31
संग्रामे युद्धभूमावुभयबलप्रेरितशरसंपातस्थाने लक्ष्यभूतो मृतः शुद्धिमवाप्नुयात्। गाढ
मर्मजनितप्रहारतीव्रवेदनो मृतकल्पो मूर्छितो जीवन्नपि विशुध्यति। लक्ष्यभावश्च प्राय श्चप्राय
श्चित्ताभ्युपगममित्येवं विदुषां धनुर्विद्याविदां संग्रामे स्वेच्छया कर्त्तव्यो न तु राज्ञा बलात्कारयित
व्यः। यथाह मनुः। लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः इति। इदं च मरणांतिकत्वा
त्साद्धात्कर्तुः क्षत्रियस्य कामकारविषयं। अपि च अश्वमेधादिना विशुध्यति। यथाह
मनुः। यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा। अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि ९९
वा इति। अश्वमेधानुष्ठानं च सार्वभौमक्षत्रियस्यैव। यजेत वाश्वमेधेन क्षत्रियस्तु मही
पतिरिति। पराशरस्मरणात्। नासावश्वमेधं यजेत तस्य सार्वभौमस्य प्रतिषेधदर्शनात्। इदं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ताग्निहोत्रमानकृतांते तनुप्रच्छिपेत्। अतो यत्किंचिदुक्तमनादिष्टद्रव्याबादाज्यहविष्का होमा
इति तदग्निरूपेवोक्तमित्युपेक्षणीयं यजुकुर्यादिति। अनाग्नौ सिद्धेन्द्रशाग्निमुपसमाधाये
त्ति पुनरग्निग्रहणात् लौकिकाग्निप्राप्त्यर्थं पुनः चैतद्विताग्नीनां प्रतिपत्तिविधानात्। आहिता
ग्निस्तु यो विप्रो महापातकवान् भवेत्। प्रायश्चित्तेन शुद्धो ततदाग्नीनां तु का गतिः चेता न प्रा
न्नि पत्नी येशालाग्निं शमयेद्बुध इति। अशानमरणात्। तथा महापातकसंयुक्तो दैवात्स्या
दग्निमान्यदि। पुत्रादिः पालयेदग्नीन युक्तस्त्वा दोषसंक्षयात्। प्रायश्चित्तं न कुर्याद्यः कुर्वन्
वाग्नियते यदि। गृह्यं निर्वापयेत्क्रोतमर्पयेत्स परिक्लेदमिति कात्यायनस्मरणात् तनुप्रच्छे
पञ्चौत्पात्यो स्यात् पवित्रं धोमुखेन कर्तव्यः। यथाह मनुः। प्रास्येदात्मन मग्नौ वास मिद्धे चिरवा
कुशिरा इति। गोतमेनापव विशेषोदर्शनं तथा च काठकश्रुतिः अनप्राशनेन कर्षितो सिमा
रोहेदिति छंदश्च मरणान्तिकप्रायश्चित्तं कामकारविषयं। यथाह मांगिराः प्राणान्तिकं
च यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः तत्कामकारविषयं विज्ञेयं नात्र संशय इति। तथा। यः का
प्रायश्चित्तं न मंडैनांशा [illegible] स्विरव धीतस्येति [illegible] नकर्ते [illegible]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उ

कार्यंरूविघ्नमनुग्वानुचरत्वतिस्तोतःसरस्वतीमितिमंस्मरणात्।अयंचवेदतपोविदुषो
मि.ता. हंतुंनिर्द्वन्द्वमसौतंतगुणावतोनिर्गुणाच्चापादनेप्रमादकृते द्रष्टव्यः।सरस्वतीगमनंतु 33
तादृशएवविषयेविद्याविरहिणोद्रष्टव्यं।निमित्तिनश्रुतिरस्मृतेर्यद्वाविप्रानिर्गुणोनि
११.. यतेयदीतिस्मृतंवचनस्पदर्शितत्वात्।यत्तुनर्मनुवचनंजपित्वात्रपतमंवेदंयोजना
नाशातंब्रजेदिति।तदपरापेनियतोऽजयेतत्पवविषये।शाकुस्यद्रष्टव्यं।।।।वित्त।।।।या
त्रेंधनंवापयासंदत्वाशुद्धिमवाप्नुयात्।आदानकृविशुद्ध्यर्थमिष्टिर्वैश्वानरीस्मृता।
रा न!विद्ययाकेवलयेतुलब्धोरा पात्रेगोमूत्रहिरण्यादिकंजीवनाययपोहंसमर्थेयधनंदत्वा
शुद्धिमवाप्नुयात्।तद्धनंयःप्रतिगृह्णातितस्यैवैश्वानरदेवतेष्टिःशुद्ध्यर्थेकर्त्तव्या।एत
ज्ञाहिताग्निविषयंत्रनाहिताग्नेतद्देवत्यश्चरुर्भवति।यएवाहिताग्नेर्द्धर्मःसएवोपासनि
कस्येतिगृह्यकारवचनात्।वाप्राद्यात्सर्वस्वं।सपरिच्छदंवागृहंदद्यात्।यथाहमनुः।स ११०
र्वस्वंवावेदविदेब्राह्मणायोपपादयेत्।धनंवाजीवनायालंगृहंवासपरिच्छदमितिद्व

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

र्वं एवमेधानुष्ठानं सावन्तो मस्य कामकारकृते मरणांतिवस्थाने दृष्टव्यं महापातककर्त्तार

श्चत्वारो मतिपूर्वकं। अग्निं प्रविश्य प्रवृद्धो तिस्थिलावा महतिकृता विंतियमेनं मरणफला

ग्निप्रवेशतुल्यतया महाक्रतोरश्वमेधस्य निर्दिष्टत्वात्तस्य वर्जितादयस्त्रैवर्णिकस्याहिता

ग्निरिष्टप्रथमयज्ञस्य द्वादशवार्षिकेणा सहविकल्प्यतो न च स्य वर्जिता यथ माधानं प्रथमम

ह्यानुष्ठानं वा कार्यं। पतितस्य द्विजातिकर्म: स्वनाधिकारान्न च संध्योपासनवदविरोध इति

युक्तं। आधानादेःक्रतुरक्रतुशेषत्वानावात्। तेन च दक्षिणाणान्नूनाधिकाश्रयतो न द्वादशवार्षि

कत्रैवार्षिकादिषुस्तद्वादशवादिषु व्यवस्थापनीया:। किंच। अरत्ये नियतो ऽरण्या विवेवे

दस्य संहितां शुद्धिनचामितमशीत्वा प्रतिस्रोत: सरस्वती। अरण्ये निर्जने प्रदेशे नियतो नि

यताहार:। जपे द्वानियताहारद्वतिमनुस्मरणात्। त्रिवारं मंत्रब्राह्मणात्मकं वेदं जपित्वा शु

द्धतिसंहिताग्रहणापदकं मनुदासार्थं। यद्वामिताशनो न्त्वाभ्यां द्वा त्रयश्च वा ऽ दारभ्य

पश्चिमोदधेः प्रतिस्रोतः स्रोतः प्रतिसरस्वतीमित्वा गत्वा शुद्ध्यति। अशनं च हविष्येण

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि.ता.
११

वर्णात्तपोवनविहारी स्यात्। स्थानवीरासनी संवत्सरे पूर्णे हिरण्यमणिगोधान्यतिलभूमि
सर्पींषि ब्राह्मणेभ्यो दद्यात्ततः पूतो भवतीति तदहत्वा सर्वस्य घनवतो जातिमात्रव्यापादने द्रष्ट
व्यं। यत्पुनर्वसिष्ठवचनं। द्वादशरात्रमब्भक्षो द्वादशरात्रमुपवसेदिति तन्मनसाध्यवसि
तब्राह्मणहत्यस्यास्वत एवोपरतजिघांसस्य वेदितव्यं। यत्पुनः षंढं तु ब्राह्मणं हत्वा शूद्रह
त्या व्रतं व्रतेत्। चांद्रायणं च कुर्वीत पराकद्वयमेव चेति षट्त्रिंशन्मतवचनं। तदप्रत्यानेय
पुंस्त्वस्य सप्रत्ययवधे द्रष्टव्यं। अत्रैव विषये अप्रत्ययवधे द्वहस्यातिरात्र अरुणायाः सरस्व
त्याः संगमे लोकविश्रुते। शुद्ध्येत्त्रिषवणस्नायी त्रिरात्रोपोषितो द्विजः। एवमन्यान्यपि स्मृ
तिवचनान्यन्विष्य विषमाणां व्यवस्था समानानां तु विकल्पः। एतानि च द्वादशवार्षिकादि
धनदानपर्यंतानि ब्राह्मणस्यैव। क्षत्रियादेस्तु द्विगुणादिकं यथाहांगिराः। पर्षद्या ब्रा
ह्मणानां तु सा राजन्ये द्विगुणा मता। वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतमिति। एवं १.११
च ब्राह्मणानां येन हतत्व हन्यमानगतगुणविशेषेणायं प्रायश्चित्तविशेषो व्यवस्थितः स ए

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देयं च पात्रे च न दानं। निर्गुणस्याधनवतो हि तु निर्गुणस्यापादने दृष्टव्यं। तत्रैव विषये अवि
द्यमानानां च यस्य सर्वस्वदानं सा न यस्याल्पसोपस्करगृहदानमिति व्यवस्था॥ यदपि परा श
रेणोक्तं। चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके। समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दि
शेत्। सेतुबंधपथे भिक्षां चातुर्वर्ण्यात्समाहरेत्। वर्जयित्वा विकर्मस्थांश्छत्रोपानद्वि
वर्जितः। अहं दुष्कृतकर्मा वै महापातककारकः। गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघात
कः। गोकुलेषु च गोष्ठेषु ग्रामेषु नगरेषु च। तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु च। एतेषु ख्या
पयन्नेनः पुण्यं गत्वा तु सागरं। ब्रह्महा विप्रमुच्येत स्नात्वा तस्मिन्महोदधौ। ततः पूतो गृ
हं प्राप्य कृत्वा ब्राह्मणभोजनं। दत्वा च सर्वं पवित्राणि भूतानां प्रविशेद्गृहं। गवां वापि
शतं दद्याच्चातुर्विद्याय दक्षिणां। एवं शुद्धिमवाप्नोति चातुर्विद्यानुमोदितः इति। तदपि पात्रे
धनं च पर्याप्तमित्यनेन समानविषयं। यत्तु मनुवचनं। ब्रह्महा संवत्सरं कृच्छ्रं चरेदधः
शायी त्रिषवणी कर्मावेदको भैक्ष्याहारो दिव्यनदीपुलिनसंगमाश्रमगोष्ठपर्वतप्रस्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दर्शनादिति। शौचवदिति। एतच्चोक्तं गृहस्थानां द्विगुणं ब्रह्मचारिणां। त्रिगुणं तु वन
स्थानां यतीनां च चतुर्गुणमिति वचनाद्यथा ब्रह्मचर्यादीनां शौचं द्विगुणादिक्रमेण
वर्द्धते तथा शोधनं प्रायश्चित्तमपि वर्द्धत इत्यर्थः। ब्रह्मचारिणस्तु प्रायश्चित्तं द्विगुणं षो
डशवर्षादूर्ध्वमेव। अर्वाक् पुनर्बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हतीति षोडशव
र्षादर्वाचीनस्यार्द्धप्रायश्चित्ताभिधानात्। न च द्वादशवार्षिकं चतुर्गुणं त्रियमाणं मध्ये
विपत्तिशंकया समाप्त्यनुपपत्तेः प्रवृत्तिरेव नोपपद्यत इति शंकनीयं। यतः प्रक्रान्तप्रा
यश्चित्तस्य मध्ये विपत्तावपि पापक्षयो भवत्येव। यथाह हारीतः। प्रायश्चित्ते व्यवसिते क
र्ता यदि विपद्यते। पूतस्तदहरेवासाविह लोके परत्र वेति। व्यासोप्याह। धर्मार्थं यतमा
नस्तु न चेच्छक्नोति मानवः। प्राप्नोति भवति तत्पुण्यमत्र मे नास्ति संशय इति॥ ॥ अधुनानि
मित्तान्तरेषु ब्रह्महत्याप्रायश्चित्तस्यातिदेशमाह॥ यागस्थक्षत्रविड्घाती चरेद्ब्रह्मह
णि व्रतं गर्भहा च यथावर्णं तथात्रेयीनिषूदकः। दीक्षणीयायामुदवसानीयापर्यन्ते सोम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वतद्गुणाविशिष्टक्षत्रियादौ हंतरि द्विगुणाः त्रिगुणा वेदितव्याः। अनये वदि शाक्षत्रिय
वैश्यपादावपीहनेनोत्कृष्टवधे दोषगौरवात्। प्रायश्चित्तस्यापि द्वैकगुणानि द्विकल्प्यानी
यं। दोषगौरवं चदंड गौरवाद्बृहस्पते यश्चक्रू प्रतिलोमापवादेषु द्विगुणा त्रिगुणो दमः
वर्णानामानुलोम्ये च तस्मादर्द्धार्द्ध हानितः इति। यत्तु चतुर्विंशति मतवचनं प्रायश्चित्तं य
दाम्नातं ब्राह्मणस्य महर्षिभिः। पादोनं क्षत्रियः कुर्यात् अर्द्धं वैश्यः समाचरेत्। शूद्रः स
माचरेत्पादमशेषेष्वपि पापसु। इति तत्प्रातिलोम्यानुष्ठितचतुर्विधसाहस व्यतिरिक्त
विषयं। तथा मूर्द्धावसिक्तादीनामप्यनुलोमोत्पन्नानां दंडवत्प्रायश्चित्तमूहनीयं। दर्शि
तं च दंडतारतम्यं। दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति। तत्र मूर्द्धावसिक्तस्य
ब्राह्मणवधे ब्राह्मणादतिरिक्तं क्षत्रियान्न्यूनं नवार्द्ध द्वादशवार्षिकं भवति। अनये वदि
शापप्रतिलोमोत्पन्नानामपि प्रायश्चित्तं गौरवमूहनीयं। तथा अभिरणमप्यंगिरसा विशे
षो दर्शितः॥ गर्हस्यो कानि पापानि कुर्वंत्या अभिरोयदि शौच चक्रोर्धनं कुर्युर्वा ब्राह्मणानि

६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तः स्त्रीपुंनपुंसकत्वेनाविज्ञातेपिब्राह्मणगर्भेप्यामात्रप्रयुक्तेब्रह्महत्याव्रतंकुर्यादित्यर्थः यद
त्रिदेवलवचनंउपात्तंतत्तुस्त्रीपुंसादिविशेषव्यंजनेयथातथमेवप्रायश्चित्तं।यश्चात्रेयीघाति
मि·ता· शूद्रकोब्राह्मणःसोपितथाव्रतंचरेत्।हन्यमानात्रेयीवर्णानुरूपंव्रतंचरेदित्यर्थः।आ
त्रेयीशब्देनचेहमत्युच्यते।रजस्वलामृतुस्नातामात्रेयीमाहुरत्रह्येषभवत्यपत्यमितिव
११२ सिष्ठस्मरणात्।अत्रिगोत्रजाच।अत्रिगोत्रांवानारीमितिविष्णुस्मरणात्।एतदुक्तंभ
वति।ब्राह्मणगर्भवधेब्राह्मणपात्रेयीवधेचब्रह्महत्याव्रतं।क्षत्रगर्भवधेक्षत्रियात्रेयीव
धेचक्षत्रहत्याव्रतमेवमन्यत्रापीति।चशब्दात्मत्यागोनृतवचनादिष्वपियथाहमनुः।उक्त्वा
चैवानृतंसाक्ष्येप्रतिरुध्यगुरुंतथा।अपहृत्यचनिक्षेपंकृत्वाचस्त्रीसुहृद्वधमिति।य
च्चव्यवहारेअसत्यवचनेनवर्णिनांवधप्राप्तिस्तद्विषयमेतत्।प्रायश्चित्तस्यातिगुरुत्वा
त्।प्रतिरुध्यक्रोधावेशः।निक्षेपश्चब्राह्मणसंबंधी।स्त्रीचाहिताग्निपत्नीपतिव्रतात्वा ११२
दिगुणयुक्ताइष्यते।सुहृन्नस्याच।यथाहांगिराः।आहिताग्नेर्द्विजाग्र्यस्यहत्वापत्नीम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यागप्रयोगे वर्त्तमानौ क्षत्रियवैश्यौ यो वा घातयत्यसौ ब्रह्महा स्यात् पुरुषत्वे यद्व्रतमुपदिष्टं द्वा
दशवार्षिकादि तत्रैव तत्र यद्यपि यागशब्दः सामान्यवचनस्तथापि आत्रेयो मया गम्यते
सवनगतौ च राजन्यवैश्याविति वसिष्ठे सवनत्रयसंपाद्यस्य सोमस्यैव निर्दिष्टत्वात्। अ
त्रैवर्णिकलघूनि तानां द्वादशवार्षिकादिव्रतानि हत्यावृत्तानां यातिशक्तिगुणाद्यपेक्षया प्राय
श्चित्तव्यवस्था वेदितव्या ॥ ९ ॥ कर्म वाच्यादिष्वपि स्मरणं तिकं तु नातिदिश्यते तत्र प्रकरणात् अ
तः कामतो यागस्थक्षत्रियादिवधे व्रतस्यैव द्वैगुण्यं ॥ तच्च व्रतं संपूर्णमेव कर्तव्यं पूर्वयोर्व
र्णयोर्वेदाध्यायिनं हत्वेति प्रक्रमात् पूर्णं वेदितव्यं दशवार्षिकाभिधानात्। गर्भे च विज्ञातेऽसंस्कृ
तं हत्वा यथा वर्णं यद्व्रतमुक्तं तद्वधे प्रायश्चित्तमुक्तं तदेव गर्भवधे तस्यैतदेतत्त्वानुप
जातस्त्रीपुंनपुंसकव्यंजनगर्भविषयं। हत्वा गर्भमविज्ञातमिति मानवे विशेषदर्शनात्।
अत्र च यद्यपि ब्राह्मण्या गर्भस्य ब्राह्मणत्वादेव च निमित्तकृत प्रायश्चित्तं तथापि स्त्रीत्वस्या
पि संभवात् स्त्रीशूद्रविट्क्षत्रवधस्तूपपातकत्वे न तत्प्रायश्चित्तं प्रायश्चित्तमपि स्याद्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्रतंचरेत्तथाचगौतमः॥स्त्रीशूद्रविट्क्षत्रवधेऽस्त्र हत्वापीति ननु हनने तदभावे चैकप्राय

मि॰ता॰ श्चित्तत्वानुपपत्तेः।सत्यमतएवोपदेशिकेष्वप्यन्यूनत्वादातिदेशिकानांपादोनान्येवब्रह्मह

१५८ त्यादिव्रतानिद्वादशवार्षिकादीनिभवंति।एतच्चप्रपंचितंप्राक्॥किंच॥द्विगुणंसवनस्थे

तुब्राह्मणेव्रतमादिशेत्।यस्तुसवैसंपार्थेसोमयागमनुष्ठितंब्राह्मणंव्यापादयतितस्मि

न्द्वादशवार्षिकादिव्रतंद्विगुणंसमादिशेत्।तेषांचव्रतानांगुरुलघुभूतानांजातिशक्ति

गुणाद्यपेक्षयासत्यपिसवनस्थत्वरूपविशेषेसर्वत्रदेवव्यवस्थावगंतव्या।ब्रह्महत्यास

मानानांलघुगुरूर्ध्वधिक्षेपादीनांअतिदेशिकेष्वपिन्यूनत्वादर्द्धोनंद्वादशवार्षिकादिप्रायश्चित

मित्युक्तं॥ ॥इतिब्रह्महत्याप्रायश्चित्तप्रकरणं॥ ॥अथक्रमप्राप्तंसुरापानप्रायश्चित्तंप्रक्रमते नद्यपा॰

सुरांबुघृतगोमूत्रपयसाममिसंनिभं।सुरापोन्यतमंपीत्वामरणाच्छुद्धिमृच्छति॥सुरादीनां

मध्येन्यतममग्निसंनिभंक्वाथ्यपादितमग्निस्पर्शादहशक्तिकंकृत्वापीत्वासुरापोमरणाच्छु ११८

द्धिंप्राप्नोति।गोमूत्रसाहचर्यात्गव्येएवघृतपयसीग्राह्ये।घृतपयःसाहचर्याच्चगोमूत्रम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निंदितां। ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति। सवनस्थां स्त्रियं हत्वा कृतं चरेदिति पराश
रस्मरणात्। एवं च सवनस्थाग्निहोत्रिणात्रेयीवधे ब्रह्महत्याप्रायश्चित्तातिदेशी तच्छ्रुतिरि
तःस्त्रीवधस्यास्त्रीशूद्रविट्क्षत्रवधस्तूपपातकमध्यपाठादुपपातकत्वमेव। ननु ब्राह्मणो ५२
न हंतव्य इत्युक्त्वा निषेधेनुपादेयगतत्वेन लिंगवचनयोरविवक्षितत्वाद्ब्राह्मणजातेश्च स्त्रीपुं
सयोरविपर्ययात्तदतिक्रमनिमित्तप्रायश्चित्तविधेरभेदाद्द्वादशाब्दानीत्यस्यानुयत्नप्रा
प्ततत्वात्किमर्थं तथात्रेयीनिषूदकइति अतिदेशवचनं। उच्यते। सत्यपि ब्राह्मणत्वे अना
त्रेय्या वधस्य मुख्यपातकप्रायश्चित्तनिराकरणार्थमतस्तस्योपपातकमध्यपाठादुपपा
तकप्रायश्चित्तमेव। अतिदेशिकेषु च प्रायश्चित्तस्यैवातिदेशो न पातित्यस्यातः पतितत्या
गादिकार्यमत्र न भवति। किं वा चरेद्व्रतमत्यापि धातार्थं चेत्समागतः। यथावर्णमित्य
नुवर्तते। ब्राह्मणादिहनने कृतनिश्चयस्तद्वधार्थं संप्रयागतः शस्त्रादिप्रहारे कृते
कथंचित्प्रतिघातादिप्रतिबंधवशाद्यो न मृतस्तदा अहत्वापि यथावर्णं ब्रह्महत्यादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्राह्मणादि प्रति मद्यमात्रे सुराशब्दस्य रूढिं मन्यते ४
मद्यमात्रे सुराशब्दप्रयोगो गौण इत्यपि ४

मि॰ता॰
१२५

तदप्युक्तं। पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवं मधूकं मैरं मारिष्टं मैरेयं नारिकेरजं। समानानि विजानीयान्मद्यान्येकादशैव तु। द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतमिति पुलस्त्येन मद्यविशेषत्वेन सुराया निर्दिष्टत्वात्। अतश्च मद्यमात्रे सुराशब्दप्रयोगो गौणः॥ अतो पुनः पैष्ट्यां तथा हि कुत्रचनादित्यमिति संदेहे गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरेति मनुवचनात्। गुडमधुपिष्टविकारेष्वनादित्वनिर्धारणात् तत्रैव मुख्यत्वं युक्तं। न चानेकत्र शक्तिकल्पना दोषः। मदशक्त्युपाधित्वाश्रयतो न तस्यास्तु परिहरत्वात्। न च तालादिरसेष्वप्युपाधेर्विद्यमानत्वादतिप्रसंगः। पंकजादिशब्दवद्योगरूढप्रयोगात्। अतश्च यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैरिति प्रतिषिद्धानां सुराणां समानदोषत्वप्रतिपादनपरं न पुनरसुरयोर्गौडीमाध्व्योः पैष्टीसुरासमत्वप्रतिपादनपरं द्विजोत्तमग्रहणं द्विजात्युपलक्षणार्थं तदप्युक्तं। द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतमिति पुलस्त्यवचने गौडीमाध्व्योरपि सुरामद्यस्य व्यतिरेकदर्शनात्। तथा सुरा वै मलमन्नानां पाप्मा च मल १२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्गो मन्त्रं। एतच्चार्द्रवाससा कार्यं। सुरापश्चार्द्रवासा अग्निवर्णां सुरां पिबेदिति पैठीनसिवचना
त्। तथा लोहेन पात्रेण सुरापोऽग्निवर्णां मायसेन पात्रेण ताम्रेण वा पिबेदिति प्रचेतःस्मरणात्।
एतच्च सकृत्पानमात्रे। सुरापानं सकृत्कृत्वा पाग्निवर्णां सुरां पिबेदिति अंगिरःस्मरणात्। य
त्तु वसिष्ठवचनं। अभ्यासे तु सुरापाः अग्निवर्णां तां पिबेत् द्विज इति। तत्सुराव्यतिरिक्तमद्य
पानविषयं। एतच्च कामकारविषयं। सुरापानं कामकृतं ज्वलंतीं तां विनिक्षिपेत्। मुखे तया
या विनिर्दग्धे मृतः शुद्धिमवाप्नुयात्। इति बृहस्पतिस्मरणात्। यत्तु सुरां पीत्वा द्विजो मोहा
दग्निवर्णां सुरां पिबेदिति मनुना मोहग्रहणं कृतं तत्कामतोर्थो पारिज्ञानाभिप्रायेण। अत्रे
दं चिंतनीयं। किं सुराशब्दो मद्यमात्रे रूढ उत तिसृष्वेव गौडी माध्वी पैष्टीषु लोके त्वितो ह्या
मेवेति। तत्र केचित् मद्यमात्रे रूढ इति वर्णयंति। अभ्यासे तु सुराया इति वासिष्ठे पि ह्या द्वि
तयं व्यतिरिक्तेऽपि मद्यमात्रे सुराशब्दप्रयोगदर्शनात्। न चासौ गौणप्रयोग इति शंकनीयं
मदजननशक्तिमत्त्वोपाधिकतया सर्वत्र मुख्योपपत्तौ गौणत्वकल्पनाया अन्याय्यत्वात्। र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मिता॰ प्रा॰
११९

बौदृष्टौ मे केशवार्जुनाविति ॥ एवं ब्राह्मणस्य संबंधित्वेन मद्यमात्रनिषेधे सत्यपि गौडी माध्वी च
पैष्टी च विज्ञेया त्रिविधा सुरा ॥ यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैरिति । गौडीमाध्व्योः
प्रतिषेधवचनं दोषगुरुत्वेन सुरासमत्वप्रतिपादनपरं ॥ अयं च सुरानिषेधो
ऽनुपनीतस्यारूढायाश्च कन्याया भवत्येव ॥ तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥ ४५
इति जातिमात्रावच्छेदेन निषेधात् ॥ अज्ञानात्सुरां पीत्वा द्विजो मोहादिति प्रायश्चित्तविधिवा
क्ये मनुनापि द्विजग्रहणं कृतं । तत्कर्तृत्रयोपलक्षणार्थं । निमित्तभूतनिषेधसापेक्षत्वा
न्नैमित्तिकविधेर्निषेधे च वर्णमात्रस्यानवच्छेदकत्वात् ॥ यथा यस्य हविर्निरुप्तं पुर
स्ताच्चंद्रमा अभ्युदेतीति निमित्तलौकिकहविर्मात्राभ्युदयस्य निमित्तत्वाव [illegible]

राम
११९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

96

चान्नेतकृतत्वमित्यादि पुष्टीह्यादिविकारस्य च सुराशब्दस्य ।

मुच्यते ॥ तत्रान्नविकारस्यैव सुरात्वनिर्देशात् अन्नशब्दस्य स्वरूपत्वात्पैष्टीचसुरा मुख्योच्यते ॥ इतरयोस्तु सुराशब्दो गौणः ॥ यत्तूक्तं मनु ॥ गौडी माध्वीति मनुवचनात्त्रिस्त्रः एवोत्पत्तिकत्वं निर्दिश्यते गौणत्वं नदपवृत्तौ ॥ यत्तोक्तं मास्तु तु शासनवच्छक्त्यार्थसंबंधानादित्वप्रतिपादनपरं ॥ किंतु कार्यप्रतिपादनपरं ॥ अतो गुरुप्रायश्चित्तनिमित्ततया तयो गौडीमाध्व्योर्गौणः सुराशब्दप्रयोगः ॥ एवं च नानेकशक्तिकल्पनादोषो नापूपाद्याश्रयणं कृतं ॥ न चात्र त्रित्वोक्तमसङ्गृहणस्योपलक्षणत्वं ॥ यत्तस्मात् सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ॥ तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति ॥ एवं पैष्ट्याः सुरात्वं वर्णत्रयसंबंधित्वेन निषेधः ॥ गौड्यादीनां तु मद्यानां ब्राह्मणसंबंधित्वेनैव निषेधः ॥ न क्षत्रियवैश्ययोः ॥ यच्च दक्षः पिष्टा चान्नं मद्यं मांसं सुरासवं ॥ तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविरिति ॥ मानवब्राह्मणेनेति विशेषोपादानात् ॥ बृहद्विष्णुनापि ब्राह्मणस्यैव मद्यप्रतिषेधो दर्शितः ॥ माध्वकमैक्षवं मैरं तालं खार्जूरपानसं ॥ मद्यस्यैव माध्वीकं मैरेनालिकेरजं ॥ अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य त्विति ॥ बृहद्याज्ञवल्क्येनापि क्षत्रियवैश्ययोर्दोषाभावो दर्शितः ॥ कामादपि हि राजन्यो वैश्यो वापि कथंचन ॥ मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते ॥ इति ॥ आसेवापि तयोर्माध्वीपानमनुज्ञातं ॥ उभौ मध्वासवक्षीबावुभौ [illegible] नचर्चितौ ॥ एकपर्यङ्कश

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

षिप्रायश्चित्तमुक्तं। अनुपेतस्तु यो बालो मद्यं मोहात्पिवेद्यदि। तस्य कृच्छ्रत्रयं कुर्यान्माता भ्राता
तथा पितेति। अतो गौतमवचनं सुराव्यतिरिक्तमद्यपर्युषितादिविषयं। कुमारवचनं तु
स्वल्पदोषत्वापनयनपरं। अत एव प्रागुपनयनात्कृतदोषस्यापनयनमेव प्रायश्चित्तमित्युक्तं
मनुना। गार्भैर्होमैर्जातकर्मचूडामौंजीनिबंधनैः। वैजिकं गार्भिकं चैनो द्विजानामपमृज्यत
इति। अयमत्रार्थः। त्रैवर्णिकानामुत्पत्तिप्रभृति पेयप्रतिषेधः। शूद्रस्य तु न सुराप्रतिषेधो
नापि मद्यप्रतिषेधः। प्रायश्चित्तांतरमाह। बालवासा जटी वापि ब्रह्महत्याव्रतं चरेत्। पिण्याकं
वा कणान्वापि भक्षयेत्त्रिसमा निशि। [illegible]गादि[illegible]लो मर्मितबस्य प्रायव्रतः। बालवासोग्र
हणं चीरवल्कलयोरुपलक्षणार्थं। सुरापानकृतत्वेनो चीरवल्कलवाससो। ब्रह्महत्याव्र
तं चरेद्यावज्जीवमिति प्रचेतःस्मरणात्। जटित्वग्रहणं मुंडत्वनिराकरणार्थं। ब्रह्महत्याव्रतं चरेदि
त्यनेनैव सिद्धे यद्वालवसनादिकं ग्रहणं तदन्यत्र संनवंश्रूयमाणासंबंधिस्वयंमारितशिरः
कपालादिनिवृत्त्यर्थं। इदमकामतो जलबुद्ध्या गौडीसुरापिबतो [illegible] तद्विषयं। इयं विशुद्धि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ध्रु।

गतौ तत्सापेक्षत्वेनेमिति कवाकोच्छ्रयमाणामपित्रे तंडुलान्विनजेदिति तंडुलग्रहणं तंडुलादि
रूपस्य विमोत्त्रा पलक्षणार्थं। इयांस्तु विशेषः। पादोवालेषु दातव्यः सर्वं पापेष्वयं विधिरिति। वचना
त्काममकारेपिन मरणांतिकं। किंतु पादमेव द्विगुणीकृत्य षड्वार्षिकं देयं। विहितं यदकामा
नां कामान्तु द्विगुणं त्वेरदित्यंगिरःस्मरणात्। एवं [illegible]धातुरादिष्वपि योऽत्पात था तद्बालत्वेन
मार्ह्वं यदैनी मश्नता हविरिति। मद्यस्यापि जातिमात्रावच्छेदेन निषिद्धत्वादनुपनीतेन न पेयं
ननु कथमनुपनीतस्य दोषः। प्रागुपनयनात्कामचारवादभक्ष इति गौतमवचनात्तथाभ
घम्नस्त्वपुरीषाणां भक्षणे नास्ति कश्चन दोषस्तत्वा पंचमाद्वर्षादूर्ध्वं पित्रोः सुहृद्गुरोरिति कुमा
रवचना[illegible] दोषस्याभावावगतेः। उच्यते। सुरामद्ययोर्निषेधवाक्ये जातिमात्रस्यावच्छेदकत्व
श्रवणादप्रतिहतैव निषेधप्रवृत्तिः। अत एव स्मृत्यंतरे निषेधवचनं। सुरापाणं निषेध
स्तु जात्याश्रय इति स्थितिरिति। अतः पादोवालेषु दातव्यः सर्वपापेष्वयं विधिरिति। सर्वपा
पेषु सुरापाणादिष्वपीति वचनाद्वालादेरपि सुरापाने प्रायश्चित्तं। तथा जातूकर्णेन मद्यपाने

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदुभयमपि पिण्याकं वा कणान्वेति ॥ अनेन विषयं ॥ यद्वा विधानेन प्रायश्चित्तद्वयं तत्र ॥ बृहस्पतिमतेनै
ष्ठाश्रमापेक्षासमाः पुनः ॥ समतत्त्वब्राह्मणो गोहत्यादित्येकादशैरिति श्रुतिः ॥ भूमिप्रदानं यः कुर्यात्सुरां पी
त्वा द्विजोत्तमः ॥ पुनर्न च पिबेत्तां तु संस्कृतः स विशुध्यति ॥ इति तदुभयमपि पूर्वेण सहैकविषयं ॥ यदा त्व
तिप्रिन्नदक्षिणाकल्पाप्रयणात् द्वादशवार्षिकेन सह विकल्पते ॥ अत्रापि बालवृद्धादीनां सार्द्धकवर्षी
यः अनुपनीतानां तु नवमासिकमिति ॥ एवं कल्पना कार्या ॥ यत्तु मनुवचनं ॥ कणान्वा भक्षयेदब्दं पिण्याकं
वा सकृन्निशि ॥ सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी ॥ इति ॥ तत्तालुमात्रसंयोगे सुराया अबुद्धिपू
र्वो द्रष्टव्यं ॥ ननु वैदिकवद्बुद्ध्यस्याभ्यवहरणं पानमित्युच्यते ॥ अभ्यवहरणं च कण्ठस्याधोनयनं ॥ न ता
ल्वादिसंयोगमात्रमतः कथं तत्र पाननिमित्तं प्रायश्चित्तमुच्यते ॥ येन तात्वादिसंयोगेन विना पान
क्रिया न निर्वर्तते ॥ सापि पानक्रियाप्रतिषेधेन प्रतिषिद्धा ॥ अतो यद्यपि मुख्यापानाभावान्न महापातक
त्वं ॥ तथापि तत्प्रतिषेधेन तदंगभूताव्यभिचारिताल्वादिसंयोगस्यापि प्रतिषेधोऽवन्नदो

गे
पा
राम
१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृदितप्रमाप्याकामतो द्विजन्मिन्यकामतो पाधिक्ये द्विहितस्यैव न द्वादशवार्षिकातिदेशात् ॥ अत्र च सुरापानस्य
महापातकत्वात् । मत्यापि अतिदेशकल्पे संपूर्णमेव द्वादशवार्षिकं कुर्यान्न पादोनं ॥ अत एव वृद्धहारीतः ॥ द्वा
दशभिर्वर्षैर्महापातकिनः शुध्यंते इति ॥ अथवापि पिण्याकं पिंडितं समावर्षत्रयं रात्रौ भक्षयेत ॥ कणांस्तंदुलकणान्वा
स्नाला पूर्ववद्भक्षयेत ॥ एतच्च सकृदेव कार्यं । कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि । इति मनुस्मरणा
त् ॥ अस्य च पिण्याकादिभक्षणस्य भोजनादिकार्यविहितत्वात् ॥ अशनानंतरं परिग्रहः । एतच्चोदकं गुड्यासुर
पानेच्छेदतोनरे कालेवेदितव्यं ॥ एतदेवव्रतं कुर्यात् न्यायपः छेदनेरुते ॥ पंचगव्यं तस्योक्तं प्रत्यहका च
यशोधनं ॥ इति आसस्मरणात् ॥ न च सुरासंस्पृष्टे यदुपलभ्यमानतद्गंधरसोदकपानविषयमिद
मिति अतिसंदरं ॥ संसर्गपि सुरास्पर्शेन नपाने । यथाज्यलक्ष्य एवमद्यान्त्ये गतएवाज्यपा इति निगमाः
कार्यान एवमतत्त्वात् इत्येवमुक्तं न्यायविद्भिः ॥ यत्तु नरापस्तंबवचनं ॥ स्तेयं कृत्वा सुरां पीत्वा गुरुदार
गत्वा ब्रह्महत्यां च कृत्वा चतुर्थकाले मितभोजनोऽपोऽभ्युपेयात् सवनानुकल्पं स्थानासनाभ्यां विहर
न्त्रिभिर्वर्षैः पापं अपनुदतीति । यच्चांगिरसोवचनं ॥ महापातकसंयुक्तो ब्रह्मसुः तिते त्रिभिरिति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि·ता·
१२५

पःसुराजाज्ञनस्यामद्यभांडस्थितास्तथा पंचरात्रं पिबेत्पीत्वा शंखपुष्पीसृतं पयइति। यत्तु वि
ष्णूक्तं अपःसुराभाजनस्थाः पीत्वा सप्तरात्रं शंखपुष्पीसृतं पिबेदिति तन्मतिपूर्वके पाने ज्ञा
नतोऽभ्यासे तु द्रष्टव्यम् आह। सुराभांडस्थितं तोयं यदि कश्चित्पिबेद्द्विजः। सकुद्दशाकंक्षीरेण
पिबेद्वा शंखपुष्पिकामिति। सुरापस्य मुखगंधघ्राणे तु मानवं। घ्राणात्सुरापस्य गंधमाघ्रा
यसोमपः प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यतीति। तच्चामत्याज्ञानएव। मतिपूर्वेम
तिपूर्वे तु द्विगुणम् अपीतसोमस्य तु कल्प्यं साक्षात्सुरागंधघ्राणस्य तु घ्रातिरत्रेयमपयो
रिति। जातिभ्रंशकरत्वात् जातिभ्रंशकरं कर्म कृत्वान्यतमम् इच्छया। चरेत्सांतपनं कृच्छ्रं
प्राजापत्यमनिच्छयेति मनूक्तं द्रष्टव्यं। एवं मुख्यसुरापाणे प्रायश्चित्तमुक्त्वा मद्यपाने प्रायश्चि
त्तमाह। अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च। पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातय
ति। यः पुनरज्ञानादुदकबुद्ध्या सुरां मद्यं वा ब्राह्मणादयः पिबंति। ये च ब्राह्मणादयो रेतो विण्मू
त्राणि प्राश्नंति ते त्रयोपि द्विजातयो वर्णास्तप्तकृच्छ्रपूर्वकं पुनरुपनयनं प्रायश्चित्तमर्हन्ति। १२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वस्याविद्यमानत्वात्। नवत्पेय प्रायश्चित्तं चरेद् ब्रह्ममम् हत्वापि ब्राह्मणार्थं चेत्तत्रागत इति यथा
तत्र न प्रतिषेधे न तदंगत्वेनानुवसायादेरपि प्रतिषिद्धत्वात् प्रायश्चित्तं विधानं। यत्तु बौधायनी
ये मासिकं ब्रतमत्पा सुरापाणे कृछ्राद्दपादं चरित्वा पुनरुपनयनमिति। यच्च यामं सुरां पीत्वा
द्विजो हत्वा उक्तं हत्वा द्विजन्मनः संयोगं पतिते गत्वा द्विजश्चांद्रायणं चरेदिति। यदपि वार्हि
स्पत्यं गौडीमाध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकं च चांद्रायणमनुक्रमा
दिति। तत्त्रितयमप्युन्मत्तौषधसाध्यव्याधुपशमार्थं पाने वेदितव्यं प्रायश्चित्तस्याल्पत्वात्। यदा ल
तु सुरासंसृष्टं शुष्कं रसमेवान्नं नद्यायति तदा पुनरुपनयनं। यथाह मनुः। अज्ञानात्प्राश्य
विण्मूत्रं सुरासंसृष्टमेव च। पुनःसंस्कारमर्हंति त्रयो वर्णा द्विजातय इति। यदा च शुष्क सुरा
भांडस्योदकं पिबति। तदा शातातपोक्तं कुर्यात्। सुराभांडोदकपाने षडहं घृतप्राशनमह
होरात्रोपवासश्चेति। यत्तु बौधायनीयं सुरापात्रस्य सुराभांडे षपः पर्युषिता पिबेत् शंखपु
ष्पीपक्कं क्षीरं सर्पिः पिबेत्त्र्यहमिति। तत्पर्युषितत्वादधिकं। अकामतोऽभ्यासे पुनर्मनुनोक्तं। अ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि·ता·

ति। मुखमात्रप्रवेशे तु मद्यस्यायस्तं...यं चद्रात्रं। अमत्यापानमपेयानाममेध्यानां च
मद्यानां। रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत्। पद्मोदुंबरबिल्वानां पलाशस्य कुशस्य
च। एतेषामुदकं पीत्वा षड्रात्रेण विशुध्यतीति। एतच्च तालादिमद्यविषयं गौडीमाध्वीः
१२ पुनरज्ञानतः पाने सुरायाश्चाज्ञानघृतिवसिष्ठोक्तः कृच्छ्रातिकृच्छ्रसहितः पुनःसंस्कारो
घृतप्राशश्च द्रष्टव्यः। तयोर्मतिपूर्वपाने तु पिपासाकं वा कर्त्तान्वेति। त्रैवार्षिकं। कामत
स्तु तत्पानाभ्यासे अभ्यासे तु सुरायाः अग्निवर्णां सुरां पिबेत् मरणात्पूतो भवति। वासिष्ठम
रणांतिकं द्रष्टव्यं। नात्र सुराशब्दः पैष्ट्यामेव प्रायः। तस्याः सकृत्पानेपि मरणांतिकं। मद्यदर्शि
तत्वात्। मद्यवासितस्य पक्वांडस्थोदकस्याज्ञानतः पीते ह.रु.चा मनोक्तं। मद्यभांडस्थि
तं तोयं यदि कश्चित्पिबेद्द्विजः। कुशमूलविपक्केन त्र्यहं क्षीरेण वर्तयेदिति। अज्ञानतोभ्या
सेतु वसिष्ठेनोक्तं। मद्यभांडस्थितं तोयं यदि कश्चित्पिबेद्द्विजः। पद्मोदुंबरबिल्वानां पला १२
शस्य कुशस्य च। एतेषामुदकं पीत्वा त्रिरात्रेण विशुध्यतीति ज्ञानतः पानेस्तु विष्णूक्तं म

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्र मद्यपाने योयं पुनःसंस्कारः स ब्राह्मणस्यैव ज्ञात्रियविशोस्तदनानुज्ञानस्याद्दर्शित
त्वात्। सुराशब्दश्चात्र मद्यपरः। प्रायश्चित्तस्यातिलघुत्वात्। अज्ञानतो मुख्यसुरापाणे द्वाद
शवार्षिकस्य विहितत्वाच्च। अत एव गौतमेनात्र मद्यशब्दः प्रयुक्तः। अमत्या मद्यपाने पयो
घृतमुदकं वायुं प्रतित्र्यहं तप्तानि पिबेत स तप्तकृच्छ्रस्ततोस्य संस्कारो मूत्रपुरीषकुणप
परेतसां प्राशने चेति। यद्यप्यस्मिन्नेव विषये मनुनोक्तं। अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव वि
शुद्ध्यतीति। तदपि तप्तकृच्छ्रपूर्वकमेव। गौतमवाक्यानुरोधात्। पुनःसंस्कारश्च पुनरुपनय
नं। तच्चाश्वलायनाद्युक्तक्रमेण कर्तव्यं। यथोक्तं। अथोपेतपूर्वस्य कृताकृतं केशवपन
यनं। तच्चाश्वलायनाद्युक्तक्रमेण कर्तव्यं यथोक्तं। अथोपेतपूर्वस्य कृताकृतं केशवपनं मे
धाजननं चानिरुक्तं। परिदानं कालश्च तत्सवितुर्वृणीमह इति सावित्रीमिति॥ मतिपूर्वे
मद्यपाने वसिष्ठोक्तं द्रष्टव्यं। मत्या मद्यपाने त्वसुरायाः सुरायाश्चाज्ञाने कृच्छ्रातिकृच्छ्रौ घृ
तप्राशः पुनःसंस्कारश्चेति। चांद्रायणं वा। शंखोक्तं। असुरां मद्यपायी च चांद्रायणं चरेदि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मि॰ता॰

१११ स्य मद्यं शरीरस्य पतति । पतितस्य च नार्यो यस्मादर्धं शरीरस्य निःकृतिर्न विधीयत इति । तस्मा
द्द्विजातिभार्यया सुरा न पातव्या । तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति । प्रतिषेधविधौ
लिंगस्याविवक्षितत्वेन वर्णत्रयजातीयानामपि प्रतिषेधे सिद्धे पुनर्वचनं द्विजातिभार्यायाः शूद्रा
या अपि सुराप्रतिषेधप्राप्त्यर्थं । अतो द्विजातिभार्याभिः सुरापानप्रायश्चित्तस्यार्धं कार्यं । शूद्रभा
र्यायास्तु शूद्रायाः शूद्रवदेव न प्रतिषेधः ॥ सुरापानसमेषु तु निषिद्धभक्षणादिषु सुरापानप्रा
यश्चित्तार्धमित्युक्तं प्राक् ॥ ॥ इति सुरापानप्रायश्चित्तं ॥ ॥ क्रमप्राप्तं सुवर्णस्तेयप्रायश्चित्तमाह ॥ ॥ ब्रा
ह्मणस्वर्णहारी तु राज्ञे मुशलमर्पयेत् । स्वकर्मख्यापयंस्तेन हतो मुक्तोऽथवा शुचिः ॥ ॥ ब्राह्मण
स्वामिकं सुवर्णं योऽपहरत्यसौ सुवर्णस्तेयं मया कृतमिति एवं स्वकर्म ख्यापयन् राज्ञे मुशलं स
मर्पयेत् । मुशलसमर्पणस्य दृष्टार्थत्वात्तेन मुसलेन राजा तं हन्यात् तेन राज्ञा हतो मुक्तो वा शु
द्धो भवति । अपहरणानन्तरं समन्तं पर्येत्य वा ब्राह्मणस्तेयेन वाक्याद्दिहत्वे विना ग्रहणं मुच्यते । १११
मुसलं समर्पयेदिति यद्यपि सामान्येनोक्तं तथापि तस्य हननार्थत्वात्तत्समर्थस्यायोमय्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

घलौडस्थितंतोयंपीत्वापंचरात्रंशंखपुष्पीसृतंपयःपिबेदितिज्ञानतोभ्यासेतुशंखवोक्तम
घलौडस्थितंतोयंपीत्वासप्तरात्रं[illegible]गोमूत्रयावकंपिबेदिति।अत्यंताभ्यासेतुहारीतो
क्तः।मद्यभांडस्थितंतोयंयदिकश्चित्पिबेद्द्विजः।द्वादशाहंतुपयसापिबेद्ब्राह्मींसुवर्चलामिति
एषुचवाक्येषुद्विजग्रहणाद्ब्राह्मणस्याभिप्रायंक्षत्रियवैश्ययोरप्यतिदेशादितिदर्शितंप्राक्।इदं
चगौडीमाध्वीभांडस्थजलपानविषयंपुरुषत्वात्प्रायश्चित्तस्यतालादिमद्यभांडोदकपानेतु
५६ कल्प्यं।द्विजातिभार्यात्वापतिलोकंनसायातिब्राह्मणीयासुरांपिबेत्।इहैवसाशुनीगृध्री
सूकरीचोपजायते।याद्विजातिभार्यासुरांपिबतिसाकृतपुराणापिसतीपतिलोकंनयाति
किंत्विहैवलोकेशुनगृध्रशूकरत्वंत्वितांतिर्यग्योनिंक्रमेणप्राप्नोति।ब्राह्मणीग्रहणंचात्रति
स्त्रोर्णायानुप्रदर्शनार्थंतिन्यायेनयस्यद्विजातेर्याभवंत्योभार्यास्तासामुपलक्षणार्थं।अतएवमनुः।प
तत्यर्द्धशरीरस्य(यस्य)भार्यायासुरांपिबेत्।पतितार्द्धशरीरस्यनिःकृतिर्नविधीयतइति।धर्मार्थका
मेषुसहाधिकारःदंपत्योरेकशरीरत्वमिव।तोयस्याद्विजातेर्भार्याप्यसुरांपिबतितस्यभार्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

57

क्रमेणाकृष्णमृदकेनाभ्युक्ष्य वा ततः पवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थम
नन्तर्गर्भिनिःसाग्रं कुशपत्रद्वयं प्रोक्षणीपात्रार्थं महत्पात्रं आज्यस्थाली पायसार्थं चरु
स्थाली स्थालीचरुवं संमार्जनार्थं कुशत्रयं । उपयमनार्थं वेणीरूपकुशत्रयं । प्रा
देशमितपलाशसमिधस्त्रयं । स्रुवः आज्यं तंडुला दुग्धमेव माषा घृतं पूर्ण
तः पात्रं सिद्धमेव । विशिष्टमंत्र वरस्तु ब्रह्मदक्षिणार्थं पूर्णपात्रं होतृदक्षिणार्थं व
रः एवं यदवर्णितं सर्वमभ्युपकल्पयेत् । ततो वाग्यतः प्रादेशादिना कुशपत्रद्वयमा
दाय पवित्रच्छेदनकुशैः । प्रादेशमात्रे संसाद्य छित्त्वा तानपहाय पवित्राभ्यां
प्रणीतोदकं चोक्षणीपात्रं पवित्रकरणं प्रणीतोदकेन प्रोक्षणीं निधाय । उदग्र
पवित्रे अग्रकहस्तयोरंगुष्ठानामिकाभ्यां उत्तराग्रे धारयन् मध्येन प्रोक्षण्युदकं
त्रिरुत्प्लाव्य पवित्रे प्रोक्षण्यां निधाय । तत्याज्यं दक्षिणहस्तेनादाय पवित्राभ्यां
निधाय । दक्षिणहस्तानामिकांगुष्ठाभ्यां तत्र किंचिदूर्ध्वमुत्क्षिप्य । प्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गं
५

णीता जलेन प्रोक्षणीमभिषिंच्य तज्जलेन यथासादितं द्रव्यं प्रोक्षणं कृत्वोदकप
वित्रसंक्षित जलसहित पात्रं प्रणीताग्न्योर्मध्ये नरे ॥ निधाय आज्यस्थाल्यां ।
माज्यं निरूप्य चरुस्थाल्यां तंडुलान्निरूप्य प्रणीतोदकेन त्रीन्प्रक्षाल्य त
त्र प्रणीतोदके तंडुलं च प्रक्षिप्य स्वयं चरुं आज्यं ब्रह्मा गृहीत्वा ॥ प्रदक्षिणीकृ
त्याग्निं पूर्वेण नीत्वा दक्षिणतः आज्यमग्न्युत्तरतः ॥ पायसं चरुं च नार्थं पुनरपदक्षि
णे निधाय स्त्रुवं केसह हविषाग्ने ॥ प्रदक्षिणं भ्रामयित्वा ॥ तत्रैव दक्षिणतः प्रा
गग्रस्य प्राक्स्रुवं संमार्ग्य नातिप्रतप्तं तत्र स्रुवसंमार्जनं कुशाग्रैः प्रागग्रैः
तप्तं तं मध्ये मध्यतः पवे मूलेन वा मूलतो मध्यतोऽग्रतः पर्यंतं ॥ उद्धार्य संमार्जनं प्र
णीताद्भिरभ्युक्ष्य पुनः प्रतप्य ॥ आज्यं तत्र हविः स्रुवपूर्णः ॥ प्रागग्रस्य स्थापनं
विधाय पात्रे चरुं स्रुवमाज्यं मुक्त्वा ॥ अग्नि पश्चिमेन नीत्वा ज्यातः ततो निधा
य ॥ स्रुवं ततः ॥ तस्मात् आज्यं तंदुत्तरतश्चरुं निधाय ॥ प्रोक्षणीतः पवित्रे समादा

58

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प आज्यप्रोक्षणीसंस्तवनं पवित्रे प्रोक्षण्यां निधाय॥ आज्यमवेक्ष्य स्रुवमुत्पवदुक्षेता।
निरस्य प्रोक्षण्यास्तवनं निधाय॥ पायसं चरुं होमः पूर्वेस्थितं पिष्टकं चरुं विधाय
हाममसमाप्तिपर्यन्तमुपग्रहार्थं कुशौ वामहस्ते॥ उपग्रहे विधाय प्रजापतिं विवि
नमन्त्रं तिष्ठन्॥ प्राणग्रहणात्मसमिद्धं प्रदीप्य पवित्रे प्रोक्षण्यन्त्रक्षि॥ सहविके
मन्त्री प्रणीतास्वग्रहस्तेवर्षुदस्य॥ पवित्रे प्रणीतासु निधाय प्रोक्षणीपात्रे स्रु
स्थाने निधाय॥ ततो ब्राह्मणान्वारब्धो दक्षिणं जानुं नमयित्वा संस्रु
वेविने वाज्यमजस्रहस्ताय॥ स्वाहाहोतो होमः इदमग्नये इति त्यागः ओं इहमति स्वाहा
इदमग्नये॥ ओं इन्द्राय स्वाहा इदमग्नये ओं इहधृतिः स्वाहा इदमग्नये ओं इहस्व
धृतिः स्वाहा इदमग्नये॥ ओं वसुजं धरुणं मातरं धयन् स्वाहा॥ इदमग्न
प ओं रायस्पोषमस्मासु धीरयन् स्वाहा इदमग्नये॥ ततः प्राक् भज्यतमन्वदिति
ह्यभागाभ्यां नमः ओं प्रजापतये स्वाहा इदं प्रजापतये॥ अग्नेरनेन होमभागाभ्यां प्राक् ओं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रीः

५

द्रायस्वाहा इदमिंद्राय नमम उत्तरपूर्वार्द्धे ओं अग्नये स्वाहा इदमग्नये दक्षिणपूर्वार्द्धे
ओं सोमाय स्वाहा इदं सोमाय इत्याघारावाज्यभागौ संस्रवं हित्वा पात्रे संस्रवमे
कमादाय सामिद्धत्वाग्नौ संस्रावं विनैव पात्रे संस्रवं ... ओं अग्नये स्वाहा इदमग्
नये ओं रुद्राय स्वाहा इदं रुद्राय ओं सर्वाय स्वाहा इदं सर्वाय ओं पशुपतये स्वाहा इ
दं पशुपतये ओं उग्राय स्वाहा इदमुग्राय ओं अशनये स्वाहा इदमशनये ओं भ
वाय स्वाहा इदं भवाय ओं महादेवाय स्वाहा इदं महादेवाय ओं ईशानाय स्वाहा इदमी
शानाय इति हुत्वा पिष्टकेन ओं रूपयागाष्टकेन ... तु ... पूर्वार्द्धे तानुस्वेत ...
नान्तरः स्वाहा इदं ... ततः वायस पिष्टकाभ्यां ... ओं अग्न
ये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते अग्ने मध्यभागे वाज्येन ओं भूः स्वाहा इ
दं भूः ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः ओं त्वन्नो अग्ने वरुणस्य विद्वान् दे
वस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र
मुमुग्ध्यस्मत् स्वाहा इति ... ओं स त्वन्नो अग्ने ... ती वेदि ...
वमो भवा

५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वा ३ सस्तोव्या शोभ्रवयत्सतोवसूनांधूं रत्नाको श्रीद्धिमान्ध्यीकांऊं स्वहव्याननयेधिस्वाहा इदमग्नीष 61
सूतांधूं ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्वमयाऽसि अयानोयज्ञं वहास्यया
नोधेहि भेषजं स्वाहा इदमग्नये ॐ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः
तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे
विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथा
य अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय ॐ प्रजापतये स्वाहा
इदं प्रजापतये इति मनसा एवं कृत्वा संस्रवप्राशनाचमने कृत्वा पवित्राभ्यां शिरः प्रमा
र्जनं ॐ सुमित्रिया न आप ओषधयः सन्त्विति मन्त्रेण ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वे
ष्टि यं च वयं द्विष्मः इति मन्त्रेण प्रणीतास्वैशान्यां निक्षिपेत् ततः पत्न्यान्वितयजमानेन ॐ मूर्धा
नं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निं कविं सम्राजमतिथिं जनानामासन्ना
पात्रं जनयन्त देवाः स्वाहा इदमग्नये वैश्वानराय इति यजमानः हि होता पूर्णाहुतिं कुर्यात् ततस्त
त्कर्मणा वह्निं हुत्वा आज्येनाभिघार्य ॐ देवा गातुविदो गातुं वित्त्वा गातुमित मनस

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२

६ स्पत इमं देवयज्ञꣳ स्वाहा वातेधाः स्वाहा ॥ इदं वरुणाय इति चतुर्भिर्होमं कुर्यात् ततो यज
मानः कुशाक्षतयवतिलजलान्यादाय ॐ अद्य कृतैतत्कर्मणः साङ्गतासिद्ध्यर्थं कृताकृतावेक्षणरूपब्रह्म
कर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं अमुकगोत्रायामुकशर्मब्राह्मणाय दक्षिणां तु
भ्यमहं संप्रददे इति ब्राह्मणे दक्षिणां दद्यात् स्वस्तीति प्रतिवचने यजमानेन तत्परितो
षार्थं किंचिद्दातव्यं ततो वरस्थपात्रस्य वर्हिः कांस्यान्युपनीय कुशादीन्यादाय ॐ अद्य कृतै
तत्कर्मणः साङ्गतासिद्ध्यर्थं होमप्रतिष्ठार्थमेतान्निवरपुरःस्थितकांस्यान्निरुहस्यान्नं च हि
रण्यदैवतं अमुकगोत्रायामुकशर्मब्राह्मणाय होत्रे दक्षिणां तुभ्यमहं संप्रददे इति होत्रे
दक्षिणां दद्यात् स्वस्तीति प्रतिवचने ततो ध्यायं जपित्वा कर्मकारमाहूय वरस्य मंकयोर
स्य चाग्निमध्याद्दक्षिणपार्श्वे चर्मणोपश्चिमपादं वाममपार्श्वे विमुच्य नरक्षमंकयोः त
तो वरस्त्री वरवधू पसहितं रक्षमं कुशजलेन स्नापयेत् तत्र मन्त्रः ॐ हिरण्यवर्णाः
शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः या अग्निं गर्भं दधिरे सुवर्णास्ता न आ
पः शं स्योना

६

62

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

णःशंस्योनाभवंतु ॐ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यन्जनानांयाअ
ग्निंगर्भंदधिरेसुवर्णास्तानआपःशंस्योनाभवंतु ॐ यासांदेवादिविकृण्वंतिभक्षंयाअं
तरिक्षेबहुधाभवंति याअग्निंगर्भंदधिरेसुवर्णास्तानआपःशंस्योनाभवंतु ॐ शिवेन
माचक्षुषापश्यतापःशिवयातन्वोपस्पृशतत्वचंमेघृतश्चुतःशुचयोयाःपावकास्ता
नआपःशंस्योनाभवंतु ॐ शन्नोदेवीरभीष्टयआपोभवंतुपीतयेशंयोरभिस्रवंतु
नःइति ततोलोहघटिकान्तःकनकपट्टिकादिभिःपंचाव्लेकृत्यात्रिवीमघमर्ष
णंकृत्वानदुःखस्मेर्के यद्देवादेवहेडनंइत्यादिमंत्रंपठेत्जपेत् ततोदृष्टमस्य द
क्षिणेकरेः ॐ पितावत्सानांपतिरघ्न्यानामथोपितामहतोगर्भराणांवत्सोजरायुप्रति
धुक्पीयूषआमिक्षाघृततद्वस्यरेतः ॐ रुद्रोहिमन्वानधर्मकृत्प्रादुःप्रकीर्तितः
वृषोभिलभते...सर्वतः इतिमंत्रद्वयंपठित्वा कुशाग्रयवतिलजलान्यादा
य ॐ अद्यशोचांतद्वितीयेहनिअमुकगोत्रस्यपितुरमुकप्रेतस्यमातृकामारुद्रदेवतं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री

ऋषभमेनं पतिं वो ददामि तेन क्रीडंतिश्चरथ प्रियेण मा नाहाः प्रजनुषा अभगा रायस्पोषेण

समिषा मादेमेत्युक्त्वा ॥ लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः श्वेतः खुरविषाणाभ्यां

स नीलो वृष उच्यते नीलवृषे नीलवदपुत्सर्पः कार्त्तिक्यां वृषोत्सर्गनिमित्तकमाभ्युद

यिकं कृत्वा ॐ अद्य कार्त्तिक्यां रुद्रदेवत्यमात्मानाहमिमान् युवान् विष्णुदेवतानमुक

गोत्रायामुकप्रमितप्राणस्य तुभ्यमहं संप्रददे इति पूर्ववत्संकल्प्य ब्राह्मणाय दद्यात् द

क्षिणां च दद्यात् ॐ कार्त्तिक्यां ... अमुकगोत्र ... अमुकप्रेतस्य ... रुद्र

दैवतं ऋषभमेनं युवानं पतिं वो ददामि तेन क्रीडंते चरथ प्रियेण मा नः साप्त जनुषा

सुभगा रायस्पोषेण समिषा मदेम ... एतयैव ... पितामह ...

नान् ... देवता ... पतिं ... मिते

युवानं ... ददामि ... तेन ... क्रीडंतो ...

... मा नः ... विषय ...

... जन्म ... केन

65

एषा गृह्णेनवं द्रुसमदेम हृग्राभवेमकुश्मसा लोकस्यत्रियाइति ततईशानीदिशायंचापिचाल्व
येत पूजयेत् एषोघः ॐसोपकरणवत्सतरी चतुष्टयसहितवृषभाय नमः इदमनुलेपनं
ॐसोपकरणवत्सतरी चतुष्टयसहित इतिपुष्पे एतानि धूपदीपतांबूलानिनिवेद्यानि
ॐसोपकरणवत्सतरी चतुष्टयसहितवृषभाय नमः ततोवत्सतरी चतुष्टयमध्यगतंवृ
षममभिमंत्रयेत तत्रमंत्रः ॐमायोभूरभिमाम्बौहि स्वाहा मूरुतासि मरुतां गणः
मि शंभूर मयोभूरभि माबाहि स्वाहा वेसूरसि दुवस्वान्खं रमायोभूरभि माबाहि स्वाहा
ॐयाऽऽस्मिन् स्वर्णेदिवमानलं निरस्मभिः ताभिर्ब्रह्य घस्वर्णमीशच्छेजनायनसाकृ
घि यावोदेवाः सूर्ये रुचो गा ... यारुच इंद्राग्निताभिः सर्वाभीरुचन्नोधत्तबृहस्पतये
१५० रुचेंब्रोत्रहिब्राह्मणोरुच राजांस मस्कृधि रुचंहमानयाप्रमप्राप्तीः स्वर्णार्धमीस्वाहा ६७
स्वर्णार्कः स्वाहा स्वर्णज्योतिः स्वाहा स्वर्णसूर्य्यास्वाहा ततःकृतापहुत्वोदत्ताग्रमुत्सर्ग
मानेत्पातयित्वा ॐयवतिलपुष्पमोदकाद्दीन्यादाय तांस्यपात्रादितामंत्रसंपकलसंदिश्य
२८
विशेषश्रूद्रेषु सधिधे दिरुचारुचं तत्वा पामि ब्रह्मणा वंदमानस्
शास्ते पजमानो हविर्भिः ... मानो व रुणोस्ते वोधय रपा ... प्रमोषी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रे
८ मलित्रयेणतर्पयेत् ॥ अनेन मंत्रेण ॐ स्वधा पितृभ्यो मातृभ्यो बंधुभ्यश्चाप्यायितृप्तये त्वं 66
गालवहाश्चये केचिद्ये चान्ये पितृपक्षजा गुरुश्वशुरबंधूनां ये कुलेषु समुद्भवाः ये प्रेतभा
वमापन्नाये चान्ये श्राद्धवर्जिताः वृषोत्सर्गेण ते सर्वे लभंतां प्रीतिमुत्तमां इति ततः कर्म
प्र० कारमाहूयाभिमंत्रितेन तस्मै दद्यात् ॐ ब्रह्मा ब्राह्मणान् स्माभवयेत् यत्किंचिद्धिमयो जले
त्सपिंनदन्यान्नयेत् ॥ अथ कपिलादानं ॐ सोपकरणायै सवत्सकपिलगवे नमः
ॐ ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिः संपूज्य इमां सोपकरणां सवत्सां कपिलां
दास्यामीति द्विजकरे जलदानं जलेन देय देयद्रव्याभिषेचनं कुशा तिलान्यादाय ॐ अद्येत्या
वांतद्वितीये तिथौ अमुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्राप्तिकाम इमां कपिलां हेमशृं
गीं रौप्यखुरां वस्त्रयुगाच्छादितां कांस्योपदोहां मुक्तालांगूलविभूषितां सवत्सां रुद्रदैवतां
अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ॐ स्वस्तीति प्र
तिवचनं ततो दक्षिणां द्रव्यादिकमादाय ॐ अद्य कृतैतत् सोपकरणसवत्सकपिला
गवीदानप्रतिष्ठार्थं इदं हिरण्यमग्निदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दद् ८
नवा ... तं नन्दीरूपा त... केनचिन्नक वित्त ततो रुद्राग्रे बद्ध सर्पिं के
पायसं ... जयेत् ...

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्षिणां तुभ्यमहं संप्रददे इति दद्यात्। ततः प्रतिगृहीत्वा स्वस्तीत्युक्त्वा गोपुच्छग्रहणं यथाशाखं कामस्तुतिं च कुर्यात् ततः ॐ
कादात्कस्मा अदात् कामोदात् कामायादात् कामो दातः कामः ततः प्रतिगृहीता काम एतत्ते इति यजुर्वेदे ॐ कइ
दं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिगृहीता कामः समुद्रमाविशत् कामेन त्वां प्रतिगृह्णा
मि काम एतत्ते इति सामवेदे कामस्तुतिः यथोक्तकपिलालाभे केवलामपि दद्यात् तत्र पूजादि पूर्ववत् ॐ अद्या
शौचांत द्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्राप्तिकामः इमां कपिलां गां रुद्रदैवतां अमुकगोत्रायामु
कशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् स्वस्तीति प्रतिवचनं ततो दक्षिणां द्रव्यादिकमादाय ॐ
ऽद्य कृतैतत्कपिलगवीदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षि
णां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्तीति प्रति गोपुच्छग्रहणं कामस्तुतिं च पूर्ववत् ततो महान
द्यादिषु सर्वेष्वेवमन्यतीर्थानि मनसा ध्यात्वा तज्जलेनात्मानमभ्युक्ष्य उत्तरेत् ॥ अथैकादशाहश्राद्धप्रयोगः
सवास्वगतिमापानानुसारेण लिख्यते तत्र पूर्वेद्युर्वा निमंत्रणं संभवेत् तस्मिन्नेवाह्नि वा श्राद्धवेलायां मंडला
द्बहिः शुचिराचांतः शुक्लद्विवासा गोमयोपलिप्तायां भूमौ अपसव्यो वत् कृतगोमूत्रमंडलायां भूमौ
ॐ भूम्येन नमः इति त्रिः पृष्ट्वा ततः पूजितायां दर्भकुटिलहस्तेन पात्रवासनं यजमानसदर्भेनाहूतं स्नात
मावांते स्वागतमस्ति इति पृष्टे ॐ स्वागतं इति तेनोक्ते उभावप्युपविशतः ततः श्राद्धकर्ता ॐ इदं ते पाद्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मिति पाद्यमुपनीय विसृजेत् मन्त्र पुनः पुनरभिनव्य पात्रब्राह्मण पादौ प्रक्षाल्यापसव्यादिकं कृत्वा जलाक्षत तिल गंध पुष्प
प्रेतार्घपात्रमादाय मोटकत्रिलजलान्यादाय ॐ अद्यामुकपितरमुकप्रेतश्राद्धे श्राद्धे एष पात्रार्घस्ते मया दीयते
तवोपतिष्ठतामिति पादार्घं दद्यात् शिरसोऽभिवंद्य जानुनी विश्राव्य ॐ इदं ते आचमनीयमित्याचमनीयोदकं ब्रा
ह्मणाय दद्यात् ततः स्वयं पादौ प्रक्षाल्याचम्य अपसव्यादिकं कृत्वा पुष्पचंदन ताम्बूलानि ब्राह्मणाय दत्वा ब्राह्मणद
क्षिणजानुं स्पृष्ट्वा ॐ अद्यामुकगोत्रपितरमुकप्रेतस्याद्यश्राद्धकरणाय भवंतं ब्राह्मणमहमामंत्रये ॐ आ
मंत्रितोऽस्मीति प्रतिवचनम् ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः भवितव्यं भवतामयाच श्राद्धका
रिणा ॐ सर्वायास विनिर्मुक्तैः कामक्रोधविवर्जितैः भवितव्यं भवतानो द्यतनैः श्राद्धकर्मणि इति ब्राह्म
णो नियमान्श्रावयेत् ॐ भवितव्यमिति तेनोक्ते अर्घं परिकल्प्य मोटकादिकं चादाय ॐ अद्यामुकगोत्रपि
तरमुकप्रेतश्राद्धे एष पादार्घस्ते मया दीयते तवोपतिष्ठतामिति पादार्घं दद्यात् ततः शिरसाभिवंद्य जा
नुनी विश्राव्य ॐ इदं ते आचमनीयमित्याचमनीजलं ब्राह्मणाय दद्यात् ततस्तिलजलैः तेन पात्रब्राह्मणपादौ
वा अभ्यंजयेत् ततः स्वयं पादौ प्रक्षाल्याचम्य पात्रब्राह्मणमाचम्याग्रे कृत्वा स्वदेशमागत्योपविश्य ताभिप्रा
येण सिद्धमिति पृष्ट्वा दत्तं तेनैक कुशासहितेन पालकवल्ला द्यात् श्र्के ब्राह्मणो पवेशनायासनमुपकल्प्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जिनतुगण लेमा विभ

सनं स्पृशन् ओं श्रात्रालमे देवराजा [illegible] नातो विश्वमपतो छिन्न ध्याद्गृहा
न् प्रसादये त्वामहं गुह्यम्मत्र नानाग्नि पूजेन कर्मार्चि विप्र इति पठित्वा पात्रस्थान्
गंधादिकं हस्तेन दत्वा दर्भ खम्म उपवेशयेत् ततः पात्रस्य पादयोः तत्ते दक्षि
णम् कुशत्रयं दद्यात् आसनस मीपे वर्त्तितैले नतिलाज्य श्राद्धदे
येत् कावनुम्केराम श्राद्धं कृत्वा पात्रं स्थापयेत् ततः पूर्वाभिमुख कुशान् दक्षिणे ओं
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः
शुचिः इति पठित्वा ओं पुण्डरीकाक्षः पुनातु इति पुण्डरीकाक्षं स्मृत्वा आत्मानं
द्रव्याद्यन्यात्मानं वसिंचेत् ततः कुशत्रयं तिलजलान्यादाय ओं अद्य ...
तोत्र स्य पितुरमुक गोत्रस्य प्रेतत्वविमुक्तिकामो ... दिव्य पाकात्ते षोडश श्रा
द्धान्यहं करिष्ये इति संकल्प्य एकादश मासाभ्यन्तरे धिक मासाद्यन्ते ...

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
८

पश्चात्तेनसुवर्णखण्डं पृथक् तं पुनः कुशतिलजलान्यादाय ॐ अद्यामुक 10.
गोत्रस्य पितुरमुकप्रेतस्य प्रेतत्वविमुक्तिहेतवे षोडशश्राद्धान्तर्गताद्यश्राद्धमहं
करिष्ये इति संकल्पयेत् ॐ कुरुष्वेति ब्राह्मणप्रतिवचने ॐ गायत्रीजप
महं करिष्ये इति पृष्ट्वा ॐ कुरुष्वेति ब्राह्मणानुज्ञातः द्विगायत्रीं जपेत्
सन्ध्याहुतिकालत्रये वा वाचजपनीया गायत्री ततः ॐ देवताभ्यः पितृभ्यश्च
महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः गायत्रीं त्रि
जपेत् ततोपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः मोटकादाय
य ॐ अद्यामुकगोत्र पितरमुकप्रेत आद्यश्राद्धे दशमासिके तेनयादीयते नेवो
पतिष्ठतामिति मोटकारूपमासनं तिलजलप्रादित दक्षिणाग्रमेव ... न त
तः सव्यं कृत्वा प्राङ्मुख उपविश्य ॐ कृत्वाय नमः ॐ ब्राह्मणाय नमः इति द
यब्राह्मणेभ्यः संपूज्य इदं चैतद्दाति इति द्विजपने जलदाने दत्वामुकम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अमुकगोत्र

मभिषिंच्य कुशतिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य वरुणलोकातपद्वंद्वछत्रं अमु-
त्तानांगिरिसंदैवतम् अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात्
ॐ स्वस्तीति प्रतिवचनम् ततः तिलजलकुशान् दक्षिणाद्रव्यं चादाय ॐ अद्य कृतैत-
च्छत्रदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय
तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ततः प्रतिगृहीत्वा ॐ स्वस्त्युक्त्वा छत्रं दे-
हे न धारयेत् ततः ॐ उपानद्भ्यां नमः ॐ ब्राह्मणाय नमः इति द्वय ब्राह्मणौ त्रिः संपूज्य
ॐ इमे उपानहौ ददानीति द्विजकरे जलदानं उपानहामभिषिंच्य कुशादीन्यादाय
ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य तप्तवालुकाहिकंटकित मार्गोत्तरणका-
म इमे उपानहौ वृत्तानांगिरोदैवते अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति
दद्यात् ॐ स्वस्तीति प्रतिवचनम् ततः कुशादीन् दक्षिणां चादाय ॐ अद्य कृतैतदु-
पानत्प्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तु-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री

११ स्मान्हं संप्रदद्ये इति वदेत् ततः प्रतिगृहीता ॐ स्वस्तीत्युक्त्वा उपानहौ धारयेत्
ततः अपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः ॐ अपहता असुरा रक्षांसि
वेदिषद इति वामावर्त्तेन श्राद्धदेशे तिलान्विकीर्य ॐ आयंतु नः पितरः सोम्यासो
ऽग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदंतोधिब्रुवंतु ते वंत्वस्मान् इ
ति जपेत् ततोर्घपात्रोपरि अन्तर्निहितं दक्षिणाग्रं पवित्रं धृत्वा ॐ शन्नो देवीरभी
ष्टय आपो भवंतु पीतये शंयोरभिस्रवंतु नः इति मंत्रेणार्घपात्रे जलं दद्यात् ॐ तिलोसि
सोमदैवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄन्लोकान्प्रीणाहि
नः स्वाहेति तिलान्प्रक्षिप्य गंधपुष्पं तूष्णीं तत्र दद्यात् अर्घपात्रं वामहस्ते कृत्वा पवित्रं
विप्रकरे उत्तराग्रं धृत्वा तदुपरि किंचिदुदकांतरं दत्वा ॐ या दिव्या आपः पयसा संब
भूवुर्या अंतरिक्षा उत पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शं स्योनाः
सहवा भवंतु इति पठित्वा मातृकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुक शर्मन् तस्मा
द्घश्राद्धे एष हस्तार्घस्ते मया दीयते तेन वा पातित्वा मिति ब्राह्मणकरे पवित्रोपरि दद्य

72

१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रुतेजुहोमिस्वाहा इतिजपेत् ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥ समू
ढमस्यपांसुरे इतिपठन्नन्नतामनंगुष्ठविनिवेश्य ॐकृष्णकव्यमिदंरक्षमदीय
मितिपठित्वा ॐइदमन्नं ॐइमाआपः ॐइदमाज्यं ॐइदंहविरितिविप्राणांक्रम
णांगुष्ठमन्नजलघृतान्नेषुनिवेश्य ॐअपहताअसुरारक्षांसिपिशाचावे
दिषद इति ॐ... तिलान्विकिर्य मोदकादीन्याधाय ब्राह्मण
पाणिनापात्रमालभ्य जपेत् ॐअद्यामुकगोत्रपितरमुकप्रेतश्राद्धे इदं
मन्नंसोपकरणंतेमयादीयते तवोपतिष्ठतामित्युत्सृजेत् ततोभवान्प्राश
यत्विति विप्राय पोशनं दत्वा सप्रणवां व्याहृतिकां गायत्रीं ॐमधुवातार
त्यादिऋचं ॐमधु मधु मधु इति च जपित्वा ॐअन्नहीनं क्रियाहीनं विधि
हीनं च यद्भवेत् तत्सर्वमच्छिद्रमस्त्विति पठित्वा यथासुखं जुषस्वेति ब्रा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रा॰
स्त्री॰
२३

74

स्यैकं प्रतिकुर्यात् श्राद्धश्च वर्मिन पात्रिणा पात्रमत्यजत् ॐकारं पूर्वमेवं गी
तसंज्ञ यादिभयप्रार्थनं न कुर्यात् श्राद्धकर्त्ता सर्वं ब्राह्मणेन सप्रणवव्याहृती
कां गायत्रीमथवा नाऽत्यादिऋचं ॐ मधु मधु मधु इति च जपेत् गायत्रीश्रा
व्यंतं श्रावयित्वा ॐ कृष्णश्च वाज इत्यादीन् कृत्वा ध्यान् मंत्रान् पठित्वा स्वस्ति
तिलैर् गृह्णीयात् ब्राह्मणान् भावित रूपतया ध्यायेत् ततः उदीच्यतामित्यादिकि
न् मंत्रान् ॐ सहस्रशीर्षा इत्यादि पुरुषसूक्तं ॐ आशुः शिशानो इत्यादिकि
र्यमन्त्रादीनि शान्तये पठित्वा प्रभृति विविधानि सूक्तानि च पठे
त् ततः ॐ नमस्त्र्यंबकाय विरूपाक्षाय नमस्तेनेकचक्षुषे नमः पिनाकहस्ताय व
ज्रहस्ताय वै नमः इति श्लोकमपि पठेत् ततो ब्राह्मणाधिकं स्नानं पूर्वं यव वंज
नादि गुणान्वितेन ततस्तत्र यद्दोपतम्येत् ततः उपस्पृशेत् मंदं मंदं भो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जयेत्। ततस्तत्पृष्टं ज्ञात्वा उच्छिष्टसन्निधावास्तृतदक्षिणाग्रकुशत्रयां भूमिं प्रोक्ष्य सर्वप्र
कारकमन्नं तिलघृतसहितं जलेनाप्लाव्य गृहीत्वा ॐ अग्निदग्धाश्च ये जीवा ये प्र
दग्धाः कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिमिति मन्त्रेण मन्त्रस्य फलमुद्दिश्य
कुशोपरि तदन्नं विकिरेत्। ततः सव्यं कृत्वा ऽऽचम्य हरिं स्मृत्वा ऽपसव्यं कृत्वा दक्षिणाभि
मुखो ब्राह्मणाय जलगण्डूषमिदं ते प्रतिपादयामीति दत्वा ॐ स्वदितमिति ब्राह्मणं पृच्छे
त्। स्वदितमिति तेनोक्ते ॐ पिण्डमहं करिष्ये। इति पृच्छेत्। ॐ कुरुष्वेति ब्राह्मणानुज्ञात
उच्छिष्टसन्निधौ चतुरस्रं हस्तैकप्रमाणं दक्षिणाप्लवं चतुरङ्गुलोच्छ्रितं स्थानं निर्माय। तन्मध्ये
वामहस्तेन दर्भपिञ्जूलीमादाय तन्मूलेन वामान्वारब्धदक्षिणकरेण प्रादेशमात्रं ॐ अप
हता असुरा रक्षांसि वेदिषद इति मन्त्रेण रेखामुल्लिखेत्। दर्भपिञ्जूलीमुत्तरस्यां दिशि क्षि
पेत्। तदुपरि ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति। परापुरो निपु
रो निपरा ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मादिति उल्मुकं भ्रामयित्वा रेखाद्द

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रा°
स्त्री
२४

मानः क्षिपेत् ॥ तदुपरि उपमूलं समकूर्चं कृत्वा कुशान् दक्षिणाग्रानास्तीर्य सव्यं कृ
त्वा ॐ देवताभ्य इति त्रिर्जपेत् ॥ ततोऽपसव्यं कृत्वा पत्रपुटकादिकमेकं तिलजल
गंधपुष्पयुतं वामहस्ते कृत्वा दक्षिणहस्तेन मोटकादिकमादाय ॐ अद्यामुकगो
त्रपितरमुकप्रेत श्राद्धश्राद्धार्घं अस्यानेजनं अवनेनिक्ष्व ते मया दीयते तवोपतिष्ठता
मिति कुशोपरि स्रवनेजनं दद्यात् ॥ ततः श्राद्धशेषमन्नं सर्वव्यञ्जनतिलघृतमधु
फलेनैकीकृत्य तेन बिल्वपरिमाणं पिण्डं निर्माय ॐ अद्यामुकगोत्रपितरमुकप्रे
तश्राद्धश्राद्धपिण्डस्यानेजनं अवनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति कुशोपरि
स्रवनेजनं दद्यात् ॥ ततः श्राद्धशेषमन्नं सर्वव्यञ्जनतिलघृतमध्वायुतमेकीकृत्य
तेन बिल्वपरिमाणं पिण्डं निर्माय घृतमध्वभिघारितं कृत्वा दक्षिणहस्तेनादा
य मोटकादीनि चादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत श्राद्धश्राद्धे एष पि
ण्डो मया दीयते तवोपतिष्ठतामिति कुशोपरि स्रवनेजनस्थाने स्तवोपस्थी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तद्दक्षिणकरेणपिंडंदद्यात् आचम्य तद्दर्भमूलेकरंप्रोक्ष्यसव्यंकृत्वाऽऽचम्यह
रिंस्मृत्वाऽपसव्यंकृत्वा अत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिपठि
त्वावामावर्तेनोदङ्मुखोभूत्वामनाक्श्वासंनिरुध्य तेनैवयथामुखंप
र्यावर्तयन् पितॄन्भास्वरमूर्तीन्ध्यायन् ॐ अमीमदन्तपितरोयथाभाग
मावृषायिषतेतिपठेत् अवनेजनावशिष्टंजलंपुनःपात्रेवामहस्तेकृत्वाद
क्षिणहस्तेनदाय ॐ अद्यामुकगोत्रपितरमुकप्रेतयायेचात्रपिंडेत्रावने
निक्तेमयादीयतेतवापितिष्ठतामितिपिंडोपरिप्रत्यवनेजनंदद्यात्त
तोनीवींविस्रंस्यसव्यंकृत्वाऽऽचम्यहरिंस्मृत्वाऽपसव्यंकृत्वावामेनपाणि
नाधृतंसूत्रंदक्षिणहस्तेनगृहीत्वा ॐ एतद्वःपितरोवासः इतिपिंडोपरि
धृत्वा सौत्रिकादिकमादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतअत्रायमा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रा॰ सू॰
२५

द्धपिंडे एतद्वासस्ते मया दीयते ततो पत्नि मामिन्युदुहजेत ततस्तस्मीपिंडे
गंधपुष्पधूपदीपताम्बूलानि दद्यात् ततः पिंडशेषान्नं पिंडसमीपे विकिरेत्
ततश्चाचांतस्य ब्राह्मणस्य करे जलदानं दद्यात् ॐ अपामध्ये स्थितो दे
वाः सर्वमप्सु प्रतिष्ठितं ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवंतु मे इति
जलं दद्यात् ॐ भवंतु इति ब्राह्मणस्य प्रतिवचनं ततः ॐ लक्ष्मीर्व
सति पुष्पेषु लक्ष्मीर्वसति पुष्करे लक्ष्मीर्वसति गोष्ठे सौमनस्यं सदास्तु मे
इति पुष्पाणि दद्यात् ॐ अस्तु सदा तवेति प्रतिवचनं ॐ अक्षतं चास्तु मे
पुण्यं चास्तु पुष्टिरस्तु इति अक्षते यच्छ्रेयस्करं लोके तत्तदस्तु ममेति च तंडु
लान्दद्यात् ॐ अस्तु सदा तवेति प्रतिवचनं अथवा ॥ ॐ शिवा आपः सं
त्विति जलं ॐ सौमनस्यमस्तु इति पुष्पं ॐ अक्षतं चारिष्टमस्त्विति

78

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तंडुलाच्छादीत ॐ स्वस्तीति प्रतिवचने ततः षट्कादिपात्रेष्वन्तु दर्कोप
रिकल्पयामेदिन्नीशिरस्याभिवंद्य इमं मंत्रं पठेत् ॐ नमो नमो मे
दिनी लोकमातर्उर्व्विमहिश्शैलगिरिधारिणी नमः धरित्रि
काश्यपि जगत्प्रतिष्ठे वसुन्धरे नमोस्तु ते लोकधात्रि नमो
स्तु ते सर्वरसप्रतिष्ठे नैवावनारीव नमो नमस्ते ततो मातृका
दिकमादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतस्याद्य श्राद्धे द
त्तैतद्घृपानादिकमुपतिष्ठतामिति विप्रकरेभ्युत्तयोकं द
द्यात् ॐ उपतिष्ठतामिति प्रतिवचने ततः सव्यंकृत्वा प्राञ्जलि
र्भूत्वा कृतांजलिः तन्मना सुमना दक्षिणादिशं पश्यन्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

80

श्रा॰ दी॰ २६

ॐ अघोरः पितास्त्विति पठेत् अत्र पूर्वाभिमुखीं पिंडोपरि जलधारां द
दातीत्याचारः ॐ अस्त्विति प्रतिवचनम् ॐ ततः पूर्वाभिमुखः ॐ गोत्रं
नो वर्द्धतामिति पठेत् ॐ वर्द्धतामिति प्रतिवचनम् ॐ दातारो नोभिव
र्द्धन्तां वेदाः सन्ततिरेव च श्रद्धा च नो मा व्यगमद्बहुदेयं च नो भवेत् अन्नं
च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः सन्तु मा च याचिष्म
कंचन एताः सत्याशिषः सन्त्विति ब्राह्मणान् याचेत् ॐ सन्त्विति
ब्राह्मणाः प्रतिवचनं ततोपसव्यं कृत्वा सपवित्रकुशत्रयं पिंडोपरि दक्षि
णाग्रं कृत्वा ॐ नमो वः पितरो इति पृच्छेत् ॐ वाच्यतामित्यनुज्ञातः ॐ
पितृभ्यो नमः इत्युच्यतामिति वदेत् ॐ अस्तु नमः इति प्रतिवचनं ततः पूर्वका
द्भिः स्थितजलं गृहीत्वा ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं
स्वधास्थ तर्पयत मे पितरमिति दक्षिणाग्रं जलधारां सपवित्रकुशो

२६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

81

परिदध्यात् ततोन्नश्रीषपिंडमादाय सव्यापसव्येन पिंडाधः कुशान् लुंच्य तद्धस्ते क्षिपेत् ततोर्घपात्रमुत्तानी
कृत्य मोदकतिलजलान्यादाय दक्षिणाद्रव्यं चादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कृतैतद्दाय
द्यश्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्र
ददे इति दक्षिणां दद्यात् ॐ स्वस्तीति प्रतिवचनं ततः श्राद्धकर्त्ता पात्रं ब्राह्मणस्य चरणे संवाह्य
तेन मस्तकं कुर्यात् ततो दक्षिणेन पाणिना पात्रं ब्राह्मणो दक्षिणपाणिं गृहीत्वाशयासनमंजनकंक
निकाचार्थयेत् ब्राह्मणाय अंजनकंकनिकां चादाय आयामा कुम्पमहुत्तं विश्रामेत् ततः सा
मवेदाध्यायि ब्राह्मणानां पात्रस्थं तिलोदकमुपाहरेयु ततः श्राद्धकर्त्ता तेन जलेन स्वशिरसि
द्रव्यमभिषिंचेत् ततः सव्यं विधाय ॐ अग्निमुखदेवा [illegible] तामिति यवयुतजलेन कुशैः कु
शोपरि तर्पयेत् अन्यच्छिष्यमन्नं ॐ भूतेभ्य एष बलिर्नम इति जलपुष्पाभ्यां बलिं दद्यात् ततो
ऽसामगब्राह्मणान् भोजनादिभिः संतोषयेत् ततोपसव्येन ॐ निरोकारस्वस्तीत्युक्त्वा [illegible]
णाय वदेत् स्वस्तीति ब्राह्मणो ब्रूयात् सव्यं कृत्वा पुनः ब्राह्मणानुज्ञया विजलपात्रं गृहीत्वा
निमंत्रणस्थाने स्थितो ब्राह्मणः ॐ आमा वाजस्य प्रसवो जगम्याद्देवे द्यावापृथिवी विश्व

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रा॰ श्री ८

82

आमागंतां पितरो मातरो चामासो मा आमष्यांत्वेनगम्यात् इति पठन् प्रदक्षिणीकुर्वन् वारि
धारया त्रिर्विसृज्यित्वा पूर्वाभ्यामेव पादानतु व्रज्य प्रदक्षिणीकृत्यागमवाहयेत् सव्यं कृत्वा
ॐ देवताभ्य इति जपित्वा गृहं प्रविशेत् ततः पाणिभ्यां अपसव्येन श्राद्धीयदीपनिर्वा
पणं हस्तौ पादौ प्रक्षाल्य सव्येनाचमनं कुर्यात् ततः श्राद्धदर्शिकामः ॐ प्रमादात्कुर्व
तां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः इति पठित्वा वि
ष्णुस्मरणं कुर्यात् ततोऽशौचांते द्वितीयेऽह्नि दिने एवं यथाशक्ति महाशिखारत्नानि मा
तद् वाहनेयानादिदानं दद्यान्महान्ति वेश्मानि क्षेत्राणि भूषणानि च नरो नत्वा उद्दिश्य ब्रा
तद स्मरणाय दद्यात् तद्यथा ॐ अशौचांते द्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य
नि प्रेतत्वप्रीतिकाम इमां गां रुद्रदैवतां यथानाम गोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे
इति यथाशक्ति दक्षिणां दद्यात् एवं भूमिशय्यार्थमिदं हिरण्यमादाय मपि अस्मिन्दिने
सप्रभृतीन् ब्राह्मणान् भोजयेत् तस्मिन्नेव दिने विहितमपि पंचगव्य
पानं प्रियमाचर्य ... ततः एकादशाहश्राद्धं कुर्यात्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽऽ यम्य प्राङ्मुख उपविश्य कुशतिलजलान्यादाय ॐ विष्णुर् गताश्वमेधयज्ञफलप्राप्तिकामो
ऽद्य पितृमरणादिनावधि [illegible] वत्सरौचावच्छिन्नदिनो नवत्सरे यावत्प्रतिदिनं पितृतो सोदक
कुंभदानमहं करिष्ये इति संकल्पं कुर्यात् ततोऽपसव्यादि कृत्वा मोटकादीन्यादाय
ॐ अद्यामुकगोत्र पितरमुकप्रेत कुंभसलिलमयादीयते तवोपतिष्ठतामिति सुसंजल
दद्यात् गंधयव तदुभयं पात्रब्राह्मणाय प्रतिपादयेत् अशौचोपनिपाते त्वयं दा
तव्य इति सपिंडेन केनकृत्यवर्षाभ्यंतरे ॐ अद्यामुकगोत्रपितरमुकप्रेत मुक
शर्मन् सोदकुंभसलिलमुपतिष्ठस्वेति वाक्यं कुर्यात् ततो मोटकादीन्यादाय ॐ अ
द्यकृतैतत्सोदकुंभदानप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगोत्राय ब्रा
ह्मणाय दक्षिणां दातुमहमुत्सृजे इति प्रत्यहं सोदकुंभं दत्वा दक्षिणां
दद्यात् अत्र द्वादशाहश्राद्धे कार्य [illegible] मिति केचित् तदस्यैकादशाहवत् अथ
मासिकश्राद्धप्रयोगः तत्र श्राद्धपूर्वदिने एकाभक्तादिकं विधाय प्रातः स्ने

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रा॰
श्री
९८

गवस्त्रयुगेन स्नात्वा कृतनित्यक्रिय आचांतः उपविष्टः पूर्वोपकल्पितं प्रज्वा
लितं प्रदीपं स्थापयेत् गौरसर्षपतिलादि रक्षोघ्नं आहृत्य श्राद्धदेशमागत्य ओं सिद्धि
मिति शिखां बद्ध्वा ओं कुशोदकेन जलेन ओं अपवित्रः पवित्रो वा सर्वावस्थां गतोपि
वा यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः इति पठित्वा मैयारामेणालि
पीकृतं

ओं आद्यैकमासिकं पौने एकादशमासिकं ततः
द्वादशमासिकं ततः ऊनषाण्मासिकं द्वादशमासिकं
षष्ठमासिकं ततः एकादशमासिकं श्राद्धमिति
क्रमः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

84